ग्दृष्टि संक्षयाः १६ पिडिकोद्वेष्टनं घ्राणरुक्साहो बलक्षयः सरक्तं चास्य विरामत्रं शूलं निद्राविपर्ययः १७ निर्भि
घ्नेसुदंचास्य वस्तिश्च परिदुष्यति आयम्यते भिद्यते च हिक्कते विलपत्यपि १८ मूर्छते गायते रौति संनिपातस्तु दारु
णः वाताधिके सन्निपाते दशमूलं प्रयोजयेत १९ बिल्वाग्निमंथश्योनाककाश्मरीपाटलास्थिरा त्रिकंटकं पृष्ठ
पर्णी बृहती कंटकारिका २० दशमूलमिदं स्यात्तु सन्निपातज्वरापहं अविपाकानिलश्लेष्मतंद्रापार्श्वार्तिकाश।
ज्वर २१ पिप्पलीचूर्णसंयुक्तं कासहृत्दाहनाशनं समस्तं पंचमूलं तु दद्यात्पतोत्तरे ज्वरे २२ भ्रशोल्लवास्तोल्लवाद्द
ष्णुलोषबलाबलं इति विस्फारकः पित्तोल्बणः सन्निपातः शीघ्रकारीत्यसाध्यकः तस्मिन्दाहो ज्वरो घोरो बहिरंत
श्च वर्द्धते २३ पीतविण्मूत्रनामूर्छा स्वेदः स्याद्बलसंक्षयः शीतं च सेवमानस्य कुप्यतः कफमारुतौ २४ ततश्चेनं प्रवाधं एम.

तेहिक्काश्वासप्रमीलकाः विसूचिकापर्वभेदःप्रलापोगौरवंभ्रमः २५ नाभिपार्श्वेरुजांवक्षिरस्तिन्नस्यप्रवर्त्तते स्वि
द्यमानस्यरक्तंचस्रोतोभ्यःसंप्रपद्यते २६ श्लेष्मणापीड्यमानस्यतन्द्राश्वासश्चवर्द्धते जलौकाभिरसृक्स्राव्यलेपःशो
णितनाशनः २७ नहिजीवत्यहोरात्रेरोमेतेनाविषविग्रहः पित्तोल्वणोसन्निपातेक्वाथःसुंठ्यादिकोहितः २८ शुंठी
पुष्करमूलंचगुडूचीविश्वभेषजं तिक्तकंत्रायमाणांचपिप्पलीसदुरालभा २९ व्याघ्रीपर्पटकंरास्नाचाभयाकटुरो
हिणी देवदारुवचाभार्ङ्गीसमभागानिकारयेत ३० एषसुंठ्यादिकोवर्गःसन्निपातज्वरापहः श्वासंकासंदिवानिद्रां
रात्रौजागरणंतथा ३१ मुखशोषंतृषांदाहंत्रिदोषंचनियच्छति मुस्तापर्पटकोशीरदेवदारुमहौषधं ३२ त्रिफला
धान्यकंचैवेतिद्विः धन्वयासंचनीलीकाकंपिल्लंतृवृत किराततिक्तकंपाठांचंडाकटुकरोहिणी ३३ मधुकंपिप्पलीमूलंमुस्तादि
मन्यास्तंभे ४ गणउच्यते पित्तोत्तरेसंनिपातैशिरोग्रहे उरस्तंभेशिरःशूलेहंत्येवोद्धारशोणकः ३४ इतिशीघ्रकारी कफोल्व
णःसंनिपातोनाम्नायंपुष्पराणाभिधः कामात्क्रोधाच्चलोभाच्चभयाच्चायंप्रपद्यते ३५ तस्यशीतज्वरस्वप्रगौरवाल
स्यतंद्रयः छर्दिमूर्छाभ्रमोदाहस्तृष्णारोचकहृद्ग्रहाः ३६ वेष्टनंमुखमाधुर्यंश्रोत्रवाक्दृष्टिनिग्रहः हिक्काश्वासश्चार
तिर्भ्रांतिःकाशःश्वासस्तथैवच ३७ अथात्राप्याप्नोतिमृत्युंत्रिरात्रंवसतजीवति मेदोगतःस्वयंसाक्षात्कालरूपो

द्वापरः ६९ कफाधिके सन्निपाते बृहत्याद्यं प्रयोजयेत् बृहत्यौ पौष्करं भार्ङ्गी सटी शृंगी दुरालभा वत्सकस्य च बीजानि
पटोलं कटुरोहिणी बृहत्यादिगणः प्रोक्तः सन्निपातज्वरापहः ७० कासादिषु च सर्वेषु हितः —— सोपद्रवेषु च कफो
त्तरे बृहत्यादिर्गणो वा दशमूलयुक् ७१ बीजपूरादिकरसः कणासैंधवसंयुतः सन्निपातान् हृच्छ्वासकासगुल्मा
न्निमोचयेन्नित ७२ इति उष्यराः वातपित्तोल्बणो दोषैः संनिपातो विधुर्मतः तेन ज्वरो मदस्तृष्णा मुखशोषप्रमील
काः ७३ आध्मानारुचितंद्राश्च कासश्वासभ्रमश्रमाः शिरोरुक् गौरवं घर्हं सज्ञेयो लक्षणैरिमैः ७४ दशमूली सपि
रास्नापौष्करोग्रामृतौषधं त्रायंती कटुका भार्ङ्गी पाठोशीरकिरातकं ७५ धन्वयासेन्द्रयवमुस्ताभयादारुपर्पटं
यष्टीसग्रंथिकैः क्वाथो हंत्येष विधुसंज्ञकं ७६ इति विधुः श्लेष्मवातोल्बणः सन्निपातस्तु मकरी स्मृतः तस्माद्भी
तज्वरो निद्रा क्षुत्तृष्णा पार्श्वसंग्रहः ७७ शिरोगौरवमालस्यमन्यास्तंभप्रमीलकाः उदरं दह्यते चास्य कटीवस्तिश्च
दूयते ७८ संध्यस्थिशिरसः शूलं प्रलापो गौरवं भ्रमः दशांघ्रिः रिष्टकं पुष्करं भार्ङ्गी पटोलकटुकेंद्रजैः दुरालभा
शटीशृंगीक्वाथोयं मकरीं जयेत् ७९ इति मकरी पित्तश्लेष्मोल्बणो यः स्यात्स फल्गुः सन्निपातकः अंतर्दाहो व
हिः शैत्यं तस्मिन्नंद्राप्रबाधने ८० तुद्यते दक्षिणं पार्श्वमुरःशीर्षगलग्रहाः निष्ठीवेत्कफपित्तं च तृष्णा कंठश्च तुद्यते

विड्भेदश्वासहिक्काश्च वाधन्ते स्य प्रमीलिकाः छर्दिः शोषो गुरुर्दाहः स्तम्भामोहोऽस्थिवेदना ९२ किरातकौषधोशीरं
पौष्करं कटुका मता पाठा भार्ङ्गीस्तुटिके देवधीशृङ्गी दुरालभा सामयेन्द्रयवा तस्या पटोलं सह ग्रन्थिकं पर्पटः कट्
फले युक्तः क्वाथोयं फल्गुकापहः ९४ इति फल्गुकाः १ हीनमध्याधिकैर्यस्य वातपित्तकफैः क्रमात स्याद्वैदारिका
रोगोयं संनिपातस्तु दारुणः ९५ अल्पशूलेकटीतोदमध्यदाहरुजाभ्रमाः भ्रशं क्लमः शिरोवक्षोमन्याहृदयपार्श्वजाः
प्रमीलकः श्वासहिक्काकासश्चैतो विसंज्ञता प्रतिश्यायश्च दिरालस्यं तन्द्रालुचिरमार्दवं ९७ प्रथमोत्पन्नमेनं तु साध
यन्ति कथंचन एतस्मिन्सन्निविष्ठे तु कर्णमूले सुदारुणः पिडका जायते जन्तोर्यया कृच्छ्रेण सिध्यति त्रिरात्रोपरमे
तस्य व्यर्थमौषधकल्पनं १०९ कफाधिके सन्निपाते च हस्त्यादिर्गणो हितः सपञ्चमूलसंयुक्तः सिंहेनोशीरकिरातकैः ११०
चायं त्यनन्ता वासा द्वैः क्वाथस्त्वष्टावशेषकः सर्वेदारिककर्णोत्थं सन्निपातं निकृन्तति १११ इति वैदारिककर्णः मध्यहीना
नाधिके दोषैः कर्कोटको ति दारुणः अन्तर्दाहे विदोषेण ब्रवीमि च न शक्यते ११२ रक्तमालक्ष्य केनैव लक्ष्यते मुखमण्डलं
यत्नेनाकर्षितः श्लेष्मा हृदयान्न प्रसिच्यते ११३ इषुणेवाहतं पार्श्वं नुद्यते रवन्यते हृदि प्रमीलिकाश्वासहिक्का वर्द्धते च
दिने दिने ११४ जिह्वा दग्धा खरस्पर्शा गलः शूकैरिवावृतः विसर्गं नाभिजानाति कूजते च कपोतवत ११५ इति वलस्ने ।

स्मरणापूरणैः शुष्कशुक्लौष्ठतालुकः तंद्रानिद्रातियोगार्तो हतवाग्गोहतद्युतिः ११७ नचातिभजते ग्लानिं विपरीतानि गा
छति आयम्यते च बहुशः सरक्तं ष्ठीवते त्वशः इशामलकहत्यादिर्गरो ब्राह्म्यादि संयुतः अष्टावशेषकोप्लोसो क्वाथः
कर्कोटकापहः ११८ इति कर्कोटकः वहन्मध्यमहीनैस्तैः संमोहद्युतिदारुणः प्रलापश्वाससंमोहकंपमूर्छार्यतिभ्रमाः
११९ कासहिक्काप्रतिश्यायमुखशोषाविनिपातकृत् एकपक्षाभिघातस्तु एतस्त्रविशेषणं १२० इमांश्छिंसषडंगानुधन्वा
यासस मन्विते क्वाथः संमोहर्के हंतिसन्निपाते सुदारुणं १२१ इति संमोहकः हीनातिवृद्धमध्यैस्तैर्याम्यः स्यात्संनि
पातकः हारिद्रमूत्रनेत्रत्वग्दाहश्लस्माहविभ्रमाः १२२ हृदयं तुदते चास्य यकृत्प्लीहश्च पुष्पुसः पतत्येनस्य मूर्ध्वाधः
पूयशोणितमेवच १२३ शीर्णदंतश्च मर्त्यश्च एतदत्रविशेषणं षडंगस्यगणो यष्टीतिक्ताशर्वीकिरातकं १२४ द्रा
क्षावासकश्योनाकछिन्नारिष्टकपद्मकैः काकोदुंबरिकामुद्राश्टंगीरोहितकटूफलं १२५ क्वाथः शीतीकृतः पे
योमधुयुक् याम्यकापहः १२६ इति याम्यकः मध्यप्रवृद्धहीनैश्च नाम्नायं ककचः स्मृतः मोहप्रलापमूर्छाश्च
स्वेदस्तंभशिरोग्रहः १२७ वर्चोभेदोग्निदौर्बल्यं तस्मादाहोरुविभ्रमः कासः श्वासस्तथातंद्रा संज्ञानाशो हृदिग्रहः
१२८ स्वेभ्यो रक्तं विसृजति तत्राप्येतद्विशेषणं अर्वाक्त्रिरात्रान्मृत्युश्च भवत्येव न संशयः १२९ पंचमांछिषडंगे एमः

न्दुःपाठाविश्वाविषाम्बता वासकं कटुफलं क्षौद्रैः क्वाथोयं कफकचापहः १३० इतिकफकचः वृद्धेहीनेमध्यदोषेसन्निपातस्तुपाक
लः शिरोरुग्वमथुःश्वासप्रलापस्छर्द्यरोचकाः १३१ शूलाध्मानोच्चतोरस्थस्तुमतार्कपवेदना सिंहीव्याघ्रीसठीशृंगीसया
सेस्थामलकं १३२ तवतोशीरचर्माढ्कीक्वाथःपाकलनाशनः इतिपाकलः समैर्दोषैःप्रकुपितैःकूटपाकलकाभिधः त्रया
णामपिदोषाणांसम्यकूरूपाणिलक्षयेत १३३ त्रिदंडवत्समवलास्तथैवाहुल्लिपादवान यानिज्वरविकित्सायोरू।
पाण्युक्तानिकृत्स्नशः तैःसर्वैरेवसंपूर्णोविज्ञेयःकूटपाकलः व्याधिभ्योदारुणोभ्यस्ववह्निस्तंभाज्ञेसंनिभः १३४ केवलो
च्छासपरमस्तब्धांगस्तब्धलोचनः त्रिरात्रोपरमेतस्यजंतोर्भवतिजीवितं १३६ नरवस्थेनुतंदंष्ट्रामूढोव्याहरतेजनः
धर्षितोराक्षसैर्नैनंसवेलायांचरंतियत अथवाब्रुवतेकेचिद्यक्षिरणाब्रह्मराक्षसैः पिशाचैर्गुह्यकैर्श्चैकेतथान्येम
नकेहतं १३९ कुलदेव्यर्चनाहीनंधर्षितंकुलदेवतैः नक्षत्रपीडामपरेरस्तकर्मेतिचापरे वदंति संनिपातेतुभिषजःकू
टपाकले कूटस्थैर्जायतेदोषैर्वलिभिः कूटपाकलः १४० भूनिंबविश्वदेवद्रुधान्यतिक्ताकलिंगकैः गजाह्वदशमू।
लाद्यैःक्वाथोष्टादशांगकः १४१ मन्युकल्पान्ज्वरान्सर्वान्निखिलान्सन्निपातकान मूर्छादाहाहविस्तंभप्रलापभ्रम
मूढताः १४२ कासहृद्ग्रहपार्श्वार्तिश्वासहिक्कावमीहरः १४३ इतिकिराताद्यष्टादशांगकः भूनिंबशटीद्रयवधन्वय

ज्व·चि·भा· वासवाद्यपर्पटपटोलकटुकादशमूलसिद्धं पीत्वा कषायकमिदं प्रणिहंति कष्टानष्टादशांगमखिलानपि सन्निपाता।
न् १४४ शृंग्याद्यष्टादशांगः विल्वाश्मभेदकतृवत्फलपरम्मूलक्षुद्राढ्यं समसितांशगुलोनिलारिः गोमूत्रयुगला
वुकहिंगुविडैःरुपेतः क्वाथः सहृद्रुजमपास्यति सन्निपाते १४५ इति विल्वादिः शृंगीभार्ङ्गीभयाजाजीकणाभूनिंवपा
टैः देवदारुवचाकुष्टयासकट्फलनागरैः मुस्ताधान्यकतिक्ताभिः शटीपाठाहरेणुभिः हस्तिपिप्पलिचव्याग्निपिप्पली
मूलजीरकैः १४६ निंवारग्वधत्रायंतीविशालासोमराजिभिः विडंगरजनीदार्वीयवानीभिः समन्वितैः समांशैः साधितः
क्वाथो हिंग्वार्द्रकसमन्वितः अभिन्यासं जयेद्घोरं हंति तंद्रान्वितं सरगात १४९ सन्निपातान्महारौद्रांस्त्रयोदशविधांश्च ये
कर्णमूलं च हिक्कां च मन्यास्तंभं चापि विशेषतः १५० निद्रानाशं मलरोधं स्तंभं भ्रमं शिरोग्रहं दाहज्वरं च शमयेत्तथा शीतज्वरं दृढं
दुष्टस्वेदप्रशमनं शुष्कजिह्वाविशोधनं १५२ शृंग्यादिः कट्फलाब्दवचापाठापुष्करराजाजिपर्पटैः देवदार्वभयाशृं
गीकणाभूनिंवनागरैः भार्ङ्गीकलिंगकटुकाशटीसत्वरधान्यकैः समांशैः साधितः क्वाथो हिंग्वार्द्रकरसैर्युतः १५४
दशमूलयुतश्चापि देयः केचिद्वदंति हि कर्णमूलोद्भवं शोथं हंति मन्यागलग्रहं कफवातज्वरं श्वासं कासं हिक्कां हनुग्र
हं गलग्रंथिं गंडमालां स्वरभेदं कफात्मकं १५६ शिरोगुरुत्वं वाधिर्यं वह्निं च कफमेदसोः दशमूलयुतो ह्येष सन्निपाता राम:

न्निहंति हि १५८ कट्फलादिः किराततिक्तषड्ग्रंथाभार्ङ्गीवचाकुंभीशतावरी रास्नामृतलताघवींब्राह्मीत्रायंतिकाशटी पा
ठापटोलगोगोग्याँदेवदारुनिशातत्वक् वृषोविशालामंजिष्ठामोरटानिविषाभया १५९ कुष्ठंकलिंगोगोक्षुरकः स्वभद्रो
वृद्धदारकः मोहराकुंडलीयुक्तः क्वाथोद्वात्रिंशकोमतः १६० हंतिशूलंवमींहिक्कांसन्निपातांस्त्रयोदश श्वासंकासंछ
र्दिमूर्छांहृद्ग्रहंपार्श्ववेदनां १६१ व्याधीम केसरीनामकैरातादयमृतोपमः किराताद्द्वात्रिंशकः भार्ङ्गीनिंबघनाभयाम
तलताम्रनिंबवासाविषात्रायंतीकटुकावचात्रिकटुकाप्योनाकशक्रद्रुमैः रास्नायासपटोलपाटलितत्वद्दार्वीविशाला
निशाब्राह्मीपुष्करसिंहिकाढ्यशटीधात्र्यक्षदेवद्रुमैः १६२ क्वाथोयंकिलसंनिपातनिवहान्द्वात्रिंशदेवस्मरात्तद्दर्पो।
न्निजतेजसाविजयतेसर्प्पान्गारुत्मानिव किंचिच्छ्वासबलासकासगुदरुग्हृद्रोगहिक्कामरुन्मन्यास्तंभगलामयार्दि
तमलान्विषंमव्रघ्नानपि १६३ भार्ग्यादिक्वाथद्वात्रिंशकः शट्युग्राधान्यशेयैंछिनिशस्तुरवरीत्रायमाणाढतिक्तावासा
श्रृंगीगुडूचीइंद्रजकुलकंगारैःकट्फलेन्द्रीकिरातैः भार्ङ्गीदुस्पर्शशुंठीस्रजटाविजयाशिग्रुभिःसंनिपातःश्वासस्वरार्तिजा
ड्यभ्रमकसनभिरारोचकघ्नःकषायः १६४ शट्यादिषट्त्रिंशकः रास्नाश्रृंगीपटोलींद्रजलशुनगरत्वग्वरीनिंबतिक्ता
ब्राह्मीभार्ङ्गीसुराह्वछिनिशवृषविषावद्रुकटुस्त्रीदिप्पलं गोप्योक्षुरेहिमैलादशजटमम्पावेक्षशाम्पाकधात्रीत्रायं

नीहिंगुकौंतीपुरवनज [redacted] शटीकटुफलैर्श्रीकिरातः १६५ सर्वांकुंभेनिकुंभामरयवननतं
द्रोङ्खंदंकपायोहृद्रोगश्वासकासर्वज्वरपवनहृज्जाल्याग्निनामामयघ्नं १६६ रास्नादिश्चतुःषष्टिकः छिन्नाभूनिंबशुं
ठीदशाजटजलदैर्दारुरांसन्निपातं चतुर्दशांगः भार्ङ्गीछिन्नाब्दशांग्निकटुकमाद्रिभिर्निर्मितोवानिहंति १६७ षोडशां
गः हरीतकीधान्यमुस्तरक्तचंदनपद्मकैः गुडुचीद्वयवैबीसाकारवीक्तमालकैः तिक्तानागरपाठाभिः क्वतेक्वाथंकराग
न्वितं प्रपिबन्सन्निपातार्तिपिपासादाहनाशनं १६९ तंद्राकासप्रलपनंपाचनंदीपनंपरं विरामज्ञानिलविष्टंभवमि
शोषारुचिछिदं १७० स्त्यभयादिक्वाथः हरिद्रामुस्तभूनिंबत्रिफलारिष्टयासका कंटकारीद्वयंभार्ङ्गीकटुकानाग
रंकणा पटोलंपर्पटंपाठादेवदारुसरोहिषं विनुल्वकंवत्साविल्वंकुंभकारीहरीतकी १७२ कटूफलंदीप्यकद्रुजेस
र्वेमेकैकभागिकं रास्नाभागद्वयंचात्रदत्वाक्वाथंतुसाधयेत् व्योषचूर्णयुतःक्वाथोज्वरान्हंतित्रिदोषजान् त्रयोदश
महाघोरानंधकारान्ययारविः १७४ वमिंस्वेदंप्रलापंचस्तैमित्यंशीतगात्रतां मोहंतंद्रांतृषांश्वासंकासंदाहाग्निमांद्य
ताः हृत्पार्श्वशूलविष्टंभकंठकूजनकंतथा जिह्वास्फुटनकंकर्णशूलंचाशुविनाशयेत् १७६ नातःपरतरंकिंचिदौ
षधंसन्निपातके रजन्यादिगणोहेषधन्वंतरिविनिर्मितः १७७ इतिरजन्यादिमहाक्वाथः पिप्पलीचित्रकंशुंठीपिप्प रामः

ल्लीमूलकेवचा जीरकातिविषाब्दपाठाकुटजेरटकाः १७८ विडंगमरिचंमूर्वाकट्फलंकर्कटाह्वयं किराततिक्तकं
भार्ङ्गीरास्नासर्षपयासकं पोष्करंवृहतीश्रृंगीमजमोदार्कमूलकं स्योनाकदीप्यकोहिंगुतुल्यान्येतानिकल्पयेत १८०
पिप्पल्यादिकषायोयंसन्निपातज्वरंजयेत कफंवातंप्रलापंचप्रस्वेदमतिनिद्रतां शीतंभ्रमंरोमहर्षमरुचिंचापतंत्रकं
सर्वान्ज्वरांस्तथागात्रशूल्यतांचविनाशयेत सन्निपातमहोन्मत्तकरिवृंदैककेशरी १८३ इतिपिप्पल्यादिक्वाथः इति
कूटपाकलसन्निपातचिकित्सा संधिगेसंधिगःशोफस्तीव्ररुक्तज्वरोभवेत वातार्तेयोंगमर्दाद्यास्ततोनिद्राविहीनता
तापश्चवलसंनिश्चश्लेष्माराशौविवर्द्धते परमायुर्बुधैःप्रोक्तंसप्तवर्षाणिसंधिगे १८५ संधयःश्लेष्मरागःस्थानंतस्याश्ले
ष्मयुतोनिलः लंघनस्वेदनाभ्यासात्सद्योयातिनिरामतां रसःसविश्वसिंधूत्थःकौल्लत्थंकुरुतेसमे श्रमोद्यमनिल
स्याशुमारुतामयंजयेत रास्नामृताशटीदारुवृद्धदारुशतावरी शुंठीचगुग्गुलुक्वाथःसंधिगातंककृन्तवेत १८८
रास्नाशुंठीगुडूचीसहचरजलदाभीरुपथ्यासुरावैस्तिक्ताकचूरवासानिलरिपुसहितैःपंचमूलद्वयेन एभिर्द्रव्यैःकषा
यस्त्वरितमपहरेत्पीतमात्रःप्रभातेमन्यास्तंभांत्रवृद्धिज्वरविटककटीसंधिसर्वांगपीडाः १८९ त्रिफलारग्वधग्रंथीवृषैः
सिद्धंजलंपिवेत एरंडतैलसंयुक्तंवातव्याधिंहरेत्सरात १९० निर्गुंडीपुरुसिद्धार्थैरास्नायुग्मिवपत्रकैः संधिगेहं

तिधूपोयंसर्जेसिद्धार्थकुंदुरैः १९१ इतिसंधिगः शिरोधुनोतिसततमुग्रस्हसोतिरोदनं हिक्काकासकफश्वासप्रलापारा
तिमोहकृत ज्वलनकृशानुवत्तापयुतोदेहोदिवानिशं दृश्यतेहंजीवितेनस्यश्रंतकस्त्वंतकारकः १९३ धन्वयासकणाभ्रं
ठीवृहतीद्वयधान्यकैः क्वाथःसातिविषःपीतःपाचकोंतकनाशनः पटोलातिविषाभ्रंगीत्रायमाणासपुष्करं समांश
साधितः क्वाथोहंतितीव्रोतकज्वरान् १९५ सटीरास्नामृतासुंठीभ्रंगीवृषनिदिग्धिका पुष्करैकटुकापाठाकषायो
श्वांतकापहः रोहिणीधन्वयासभ्रूसकिरातकृतोपिच नाक्नेनेनवसारेवानिंबुकोवुविमर्दितं १९७ विदायवैद्योदिनस
प्तवारिज्वरारिरघुषादिगदापहारि ज्वरेछिदंजीवितदंचनित्यंमृतोजयंचेतसिचिंतयस्व १९९ इतिश्रंतकः ज्वरेणतिन्दृ
भृशंतापोरुजुमन्यागलव्यथा श्वासोमोहःप्रलापश्चत्वालयस्ततंशिरः मूर्छाशल्याकुलोदाहोस्याथीविंशतिवा
सरान् सकष्टतरसाध्योस्माकुग्दाहिजीवितेक्वचित् २०० घनाभीरुश्वास्तीकलितरुवलानिंवजटिलाजयाश्रा
णजद्रुमकुलकपाठीनशाकले समंभ्रमीनिंबामलकरशमनेरतिवलेचलव्याधिश्रांतंशमयतिचरुग्दाहमतु
लं २०१ न्यपकुकटुकाभयाकक्चहारहूरावनेभ्रतंजलमतिद्रुतेहरतिदाहमत्युन्नतं जयेज्ज्वलगुरुसहायुगल
जोक्षसंचापरेकिरातजलकद्रुणनलदपर्पटांभोधरं २०२ पैत्तिकेयेज्वरेप्रोक्ताःषडंगोचनियोजयेत् एभिःप्रयोगे

दीर्घेवपक्षेकेपपिनशाम्यति यदिदाहस्थितःकुर्यात्सुचिरंशिशिरंविधिं हर्म्येषुभ्राभ्रसंकाशेशशांककरशीतले
२८७ मलयोदकसंसिक्ते सुप्यात् दाहपीडितः नरस्योत्तानसुप्तस्यनाभिस्थेकांस्यभाजने पतंतीशीततोयस्यधारा
दाहंनिवारयेत् २८८ मलयजद्रवमिश्रितमुत्सवसत्सितिमसत्सलिलेनसहस्रसः हतजलंद्रुतमेगधतेकिलनरस्यदा
हदाहसमपोहति २८९ इतिदाहः नेत्रेनरोरक्तंगानंहास्यंमोहस्तमोभ्रमः विकटालोचनंचैवप्रलापोमरणंच २९०
आपद्यतेनरस्तेनजीवेद्वर्षत्रयंहिसः चित्तभ्रमंसन्निपातंतीव्रोनैस्यांजनैर्जयेत् मद्धीकामरदारुमत्स्यशकलामुस्ताम
लकोमस्तापथ्यारेवतरामसेनकरजोराजीफलाभिर्युता हन्युश्चित्तरुजोथदद्रुईरदलाद्राक्षापटोलीपयः पथ्यापर्पटराज
वृक्षकटुकाशंखकपुष्पायुता २९१ करंजबीजत्रिफलाहरिद्राव्योषसैंधवैः सवचाहिंगुसिद्धार्थैर्वस्तमूत्रविमिश्रि
तैः पिष्टैर्गुटीयंनस्यानेविधेयाप्रचेतना चित्तभ्रमापस्मृतिभीभ्रमतरोर्षाक्षिरोगनुत् २९२ गुडनागस्त्र्योषस्सोनस्यं
चित्तभ्रमापहं मुरामूर्द्धजमेबालन्मधूकमलयोद्भवैः २९३ मरुत्तरुमधून्मिश्रैःपुरपाणिजयाशुभिः लोहलामज्यकै
लाभिर्धूपश्चित्तभ्रमापहः ग्रहदोषहरःश्रीदःसौभाग्यकरणेपरं २९४ इतिचित्तभ्रमः यंशोफःसन्निपातांतेकर्णाधः
स्याद्धल्व्यथः प्रलापमोहबाधिर्यकंपकंठग्रहन्तकृत् प्रसेकोगव्यपाश्वासोमदरशैवारान्र्जरः सकर्णकोथकेप्याहु

ज्वरपूर्वंतुयोभवेत् २१६ सोसाध्योमध्यतोयत्नसाध्योंतेसुखसाध्यकः मासैस्त्रिभिःकर्णिकाख्योहंतिमुंचतिवानरं श्लेष्मश्चि।
कित्सामुचितोस्यधूमः प्रहर्षणःस्यात्कवलग्रहश्च नस्यंसुखंसंजनयत्यवश्यंलेपस्तुसर्वेषुहितावलेपैः २१७ रक्तावसेच
नेकार्यंनीरुजोभिर्मुहुर्मुहुः तथाकार्यंप्रयत्नेनयथापाकोनजायते प्रलेपंसमस्तेनयत्यल्पमेकः समुद्रिक्तशोफंचरक्तावसे
कः विपक्वंचशस्त्रक्रियापूयजित्साव्रणात्वंगतंचद्रुतंतच्चिकित्सा २२० निशेन्द्रीगुडूमूलैस्तुकुष्ठसैंधवदारुभिः लेपोर्कक्षी
रवान्यस्तःसर्वेवाकर्णिकापहाः निंबारग्वधमूलानिनिशायुक्तंप्रलेपनं स्रावणंपूयगंधानांरोहणंस्याद्रुजोघ्नंच २२२
तुत्थालशार्षपशिलानवसारगंधकासीसकुष्ठपटुहेमपरी करंजाः लेपात्पलंकषवृताश्चसयावशूकाःसस्वर्जिकाःस
परिकर्णिकवेदनाघ्नाः २२३ दशांघ्रित्रिफलाव्योषतिक्ताभूनिंबनिंबकैः क्वाथःपीतोबलाढ्यंतिकर्णिकस्यरुजोखिलाः भा
र्ङ्गीव्योषजयाक्षुद्रापुष्करोग्राम्लताधैः रास्नातिक्ताश्वगंधिकाभिः क्वाथःस्यात्कर्णिकापहः घृतंचपाययेत्सिद्धंयुक्तैर्वाम
धुरैरपि २२६ इतिकर्णिकः हनुस्तंभोरुचिर्दाहशिरोरुग्मोहकंपने प्रलापोध्म ज्वरःश्वासोव्यथास्याज्जलरोधनं मूर्छाच।
वेदनंचापस्मृत्योदशादिनानिवै कंठकुब्जाभिधानोयंसन्निपातैःसोसुदारुणः २२७ किरातकटुकाकरणाकुटजकंटकारीस
द्रीकलिद्रुमकलिंगाभयाकटुककट्फलांभोधरैः विषामलकपुष्करारलुकुलीरशृंगीविषैर्महौषधसमेरयंजयतिकं

ठकुब्जे गराः २२९ त्रिफलाव्योषतिक्ताब्दहरिद्रावासकैः कृतः अथ गोमूत्रयुग्मस्तु कट्वीकट्फलवत्सकं २३० क्वाथः पीतो
निहन्त्याशु कंठकुब्जाभिधं ज्वरं अपनयति कंठकुब्जं क्षिप्तापामार्गबीजकैर्नस्यं वस्तिसलिलेन सहितं त्रिकटुककटुतुंबिभि
र्नस्यं २३१ इति कंठकुब्जः वपुर्हिमं श्लथः कासो वमिर्हिक्का श्रमः कफः व्यथातिसरणं श्वासमोहः कंपस्वरक्षयाः ज्वरः
प्रलापोंतर्दाहः पक्षैकाद्युर्हिमांगके भास्वन्मूलं जीरकं व्योषभार्ङ्गी व्याघ्री शृंगी पुष्करं गोजलेन सिद्धं सद्यः शीतगात्रा
र्तिमोहश्वासश्लेष्मोद्रेककासान्निहंति २३४ कर्कोटिकाकंदरजः कुलत्थाः कृष्णा वचाकट्फलकृष्णजीरैः किराततिक्ता
ग्निककट्फलांबु पथ्याभिरुद्धर्तनमत्र शस्तं २३५ अथ रसः रसगंधकेंदुमणिताम्रविषत्रिकटूनि टंकणयुतानि
मृदुः शिखिपुष्करानिमिषपित्ततैरैः परिमर्द्य भावितमथाग्निरसैः गुटिका कृतं द्विगुणवल्लमितं घनसारजीरककणार्द्र
करसैः अतिशैत्यमोहयुतमप्यचिराज्जयति ज्वरं तमपि कष्टतरं २३७ इति शीतगात्रः ज्वरे प्रथममुत्पन्ने चक्षुर्भ्यां
नैव पश्यति तीव्रतापो भवेज्जिह्वा कृष्णा स्यात्कंटकावृता कसनं श्वसनं कंठे कूडः कर्णरुजो मदः क्रमस्तस्मात्तिसरणं
नेत्रास्यात्पंचविंशतिः वासरास्तं द्विके साध्यः प्रोक्तमागमवेदिभिः शठाब्दारुदुरालभाचरजनीकृष्णा[मरिच]कणानागरंभा
र्ङ्गीतिक्तकपाटमूलदशकं मुस्तावृहत्यावपि वासानिंबपटोलपुष्करजटाभूनिंबसार्द्धं समं क्वाथं तद्द्विकनाशने

दीया
ज्वरहरं पानादिभिर्योजितं २४१ स्तुशापथ्यामृताविश्वापौष्करं तंद्रिकापहं व्योषागस्त्यरसैर्नस्यं वाम्लालेंडुसैंधवं विषं
तिंदुकिरातं च कर्पूरं खरहाटकं सुरसारसलीटं च मृदुस्तं तंद्रिकनाशनं २४३ इति तंद्रिकः प्रलपति तरसोत्तिष्ठति विचेतनो
वेपते मुहुः पतति ज्वरः भ्रमरहाहाकुलितो यो नरः स प्रलापकः प्रोक्तः यामातिवच्चनं वक्ति सयात्ये वयमालयं चतुर्दशा।
छन। रोचनी।
द्विनान्यायुस्तस्योक्तं पूर्वसूरिभिः २४५ सतगरं खरं तिक्तां रेवतां भोद तिक्तानलदतुरगगंधाभारतीसारदूरा मलयजद
स्मलीशंखपुष्पः प्रपक्काः प्रलपनमपि हन्युः पानतो नातिदूरात सांतैरेरंजनैस्तीक्ष्णैर्नस्यैस्तिमिरसेवनैः सर्वतोवि
कृतं चित्तमस्य प्रकृतिमानयेत २४७ इति प्रलापकः पिपासाहृल्लासारुचिरवणुकासारतिमदभ्रमम्घासाध्माना
तिस्रतिवमिहिक्काज्वरकरः स्मृतोर[redacted]क्तष्ठीवी पटुलतमको ठोऽमरुजापरिम्लानो रोगी रुधिरमपि येनोद्गिरतिव
२४८ कर्णाक्षिमुखनासाभ्यो रक्तस्रावाद साध्यकः आयुरस्य दशाहं स्यात्कुर्याद्रक्तहरीं क्रियां २४९ रोहिषधन्व
यवासकवासापर्पट[redacted]गंधलताकटुकाभिः शर्करया सहितोपि कषायः संभवति हि क्षतजप्रशमाय २५० पद्म
सुगंधवाला। मेठीमधु।
कचंदनपर्पटमुस्ताजातिवराहरांचंदनवारि ल्कीतकनिंबयुतं परिपक्वं वारिभवेदिह शोणितहारि श्यामागैरि
करोध्राढसिताक्षौद्रांजनान्वितः वासकः स्वरसः पीतो रक्तं शमयति सत्वरात २५२ इति रक्तष्ठीवी श्वासप्रलापमो

रुतौ जंतुः स्यात्कासहासवान् भुग्ननेत्रे सन्निपाते आशुदंशादिनानि वै पटोलाढकवारिष्टैः क्षुद्रावासारुत्रिरोभिः क्वाथः।
पीतो भुग्ननेत्रे मदमोहज्वरं जयेत् २५४ किरातकल्को वरा राजिकाभिर्मधुप्लुताभिः प्रवरोवलेहः मधूककसारोषणरामठो
मरुत्था । चीर । गंधप्रसारणी । हरिद्वे
न्मेनस्येंजनेस्यान्मधुसिंधुकल्कैः पिचुमर्दवचारविमूलमरुत्तरुहंगोधवचतगरागुरुभिः मरुमाल्यशठीहरिद्रासिद्धकरुग
मधुसर्षपकैरिह धूपवरः २५५ इति भुग्ननेत्रः कठिनतरकंटकावृतं रसनोनम्ररोगोतिभाषतेनापि ज्वरतापकासमो।
हृश्वासयुतो जिह्वकाख्यो तः क्चिरष्टकोरिनान्यायुः कष्टसाध्यतरोमतः तीक्ष्णाद्रवैः सल्लवणो मनिता । लंगरसप्लुते २५८
जिह्वायोग्युडकल्कैर्पोमस्कत्वमपिशाम्यति कटुतैलारनालाभ्यां कुर्वीत कवलग्रहं केवलेनाथवा सद्यकांजिकेना।
स्यपशुद्धये किराततिक्ताकलिंगत्वालिंगाकचूरकल्काकटुतैलयुक्तः अम्लद्रवः संशमयेद्रसज्ञा दोषान्स्तुतो दाशरथियै
यातु २६० शाल्मरपर्णीमालूरमलामयमधुप्लुता शंखकपुष्पीसहितासेव्यावाचांविशुद्धये क्षुद्रानागरपुष्करम
तलता ब्राह्मीवचा सुव्रतामाद्रीवासकयासतोयदरसाक्काथो जयेज्जिह्वकं विश्वावर्मविभावरीयुगवरावत्साद्रिनीवा
रिदः व्याघ्री निंबपटोलपुष्करजटा हृस्ताहृभिर्वाकृतः २६२ इति जिह्वकः यस्तु विस्फारकादीनां सर्वैर्लिंगैः समायुतः
विशेषाद्दाहमोहाढ्यः सोभिन्यासोतिदुःसहः ग्रंथांतरात् त्रयस्तु कुपिता दोषा उरः स्रोतोनुगामिनः श्वामाविशुद्धाग्रा।

स्थिताबुद्धींद्रियमनोगताः २६४ जनयंति महाघोरमभिन्यासं महाहठं प्रसन्नध्यगात्रः स्वपिति न चेष्टां काचिदीहते न
चदृष्टिर्भवेत्तस्य समर्था रूपदर्शने न च गंधरसस्पर्शशब्दान्वा संबुध्यते २६६ शिरोलोडयते भीक्ष्णमाहारं नाभि
नंदति कूजयन्नोरस्तेचैवमतिप्रक्षतिहीयते अधिकात्र न मर्यादा चतुर्विंशतिवासरात् २६८ वा पाठः विकलं भा
षते चापि किंचित्संदिग्धमाचिरात न च प्रभाषते किंचिदभिन्यासः स उच्यते प्रत्याख्येयः समभ्यियं कश्चिद्देवात्प्रसि
ध्यति आयुःपक्षमितं चास्य केप्याहुः सप्तभिर्दिनैः २७० अधिकात्र न मर्यादा चतुर्विंशतिवासरात् वा पाठः स्याच्च
तुर्विंशतिका मर्यादा च दिने नरि सप्तमदशमद्वादशादिवसे प्राप्ते त्रिदोषजस्तापः पुनरपि घोरतरत्वं प्राप्य शमं या।
तिवा हंति द्विगुणा न सप्तमनवमैकादशादिवसे त्रिदोषमर्यादा एषा वधाय मुक्तौ भवति नृणां चाग्निनो ब्रूते २७२ दु
र्गे भक्ष्यि यथाग्निर्भाजनेत्वरया बुधः गृह्णीयात्तलमप्राप्तं तथाभिन्यासपीडितं निद्रोपेतमभिन्यासं क्षीणामेनं हतौज
सं संन्यस्तगात्रं संन्यासं विद्यात्सर्वात्मकं ज्वरं २७४ अभिन्यासस्तु सप्ताहाद्दशाहेन हंतौजसः संन्यासो द्वादशाहेन मल
पाकाद्विमुंचति भेदास्तु सन्निपातानां संख्या अत्योतराः स्मृताः स्वल्पबुध्यानतस्यतेन च कश्चिच्चिकित्सते २७६ अतए
व विशेषैस्ते मुनिभिश्चरकादिभिः एक एवायमुद्दिष्टः सन्निपातात्मको ज्वरः सिंही व्याघ्रमत्ता शाक्षाञ्चजाजी सकटु

त्रिकं शृंगीविडंगं च समं पथ्याविश्वाम्य साधयेत् २८९ छ.तांल्लेस्तंदुलैर्मर्द्दैः पेयामुस्तांबुना ज्वरी पिबेत्हिक्काश्वासका
सीतयाभिन्यासपीडितः स्नेहोविलीढः सितशार्षेपानोसहिंगुः शृंगगडक्कष्टंगवेरः तन्यादभिन्यासगहोग्रशाङ्गिंयथाविर
क्तं विषयाभिलाषः २९० शिरीषवीजं मरिचं वस्तमूत्रेण तत्समं अंजनेन तदभिन्यासे संज्ञाबोधनमिष्यते मातुलुंगा
द्रकरसं कोष्णं त्रिलवणान्वितं अन्यच्च सिद्धं विहितं नस्यं तीक्ष्णं प्रयोजयेत् २९२ भार्ङ्गीपुष्करमूलं च रास्नाविल्वं समु
स्तकं नागरं दशमूलं च पिप्पल्यस्तु च साधितं हिंग्वार्द्रकरसोपेतं पिप्पलीचूर्णसंयुतं संनिपातं महाघोरमभिन्यासं
च दारुणं २९४ हन्यात् शूलमानाहं सद्यः पीतं नियच्छति दंतीद्रवंतीव्रहतीसेरंडाबीजपूरकं श्यामां व्याघ्रीं च निःक्का
थ्याभिन्यासे वद्धवर्चसे कूटपाकलके सन्निपाते प्रोक्ताः कषायकाः २९५ ते सर्वेत्र प्रशस्तव्याः सद्योभिन्यासकापहाः
यस्मिंश्चिकित्सितेप्येवं यदि संज्ञा न जायते पादयोस्तं ललाटे वा दहेल्लोहशलाकया मर्मर्या जलसर्पैर्वा व्यघ्नैर्वे
वीपिदंशाने २९६ औषधैर्येन नश्यंति तेन स्ये[illegible]र्नानाविधैश्च ये विषयोगात् प्रणश्यंति सन्निपाताश्च दारुणाः २९७
इत्यभिन्यासः विश्वसटीदशमूली छिन्ना पाठा भपिप्पलीं द्रव्यैवैः सकिरातविश्ववासाः शमयंति हतौजसं सद्यः २९८
इति हतौजसः शृंगीभार्ङ्गीशटीद्राक्षारास्नादुस्पर्शपौष्करैः संज्ञाच्युतिं हरेत् क्वाथ तीक्ष्णा नस्यांजनेन वा आकल्ला।

कोथं प्रस्यातिन्नं कर्ररकट्रफलं चैतन्यकारकः क्वाथः संन्यासे संनिपातके २९३ धूमः प्रधर्मनं तो रसः सूचीभि
श्चनखांतरे केशानां लुंचनं दाहो वा स्त्रिकैर्मथयेद् दृढं २९४ इत्यभिन्यासभेदाः अंतर्दाहादिकाः सन्निपाताये
तत्र योदशः भवंति भाग्यहीनस्य मितजीविनरस्य च वैद्योनाशयशास्तस्य मेघजंजालबीजलं तथापि तेषां शा
स्त्रेनोक्तमान्वक्षणमुच्यते २९५ अंतर्दाहः शैत्यं वहिस्त्र यस्यातिसंततः श्वासः अंगमिवद्रधकल्पं सोंतर्दाह
इति कथितः इत्यंतर्दाहः नक्तं दिनं न निद्रामुपैति गृह्णाति मूर्ध्नि नभसः उत्थाय दंडपाते भ्रमातुरः सर्वतो
भ्रमति २९८ इति दंडपातः संपूर्यते शरीरं रंध्रे यिमिरभितस्तथोदरं महता श्वासातुरस्य सततं विचेतनस्यांतको
तस्य इत्यंतकः बोराणाविवरमरद्धदुःशोणासितनीललोहितं सार्ति विल्लुवन्मस्तकमभितः कुंभीपाकेन पीडितं
विद्यात् ३०० इति कुंभीपाकः उत्क्षिप्य यः स्वमंगं क्षिपत्यधस्तान्नितान मुहुश्वसिति तं प्रोर्णुनावकं विचित्रकर्णं
विजानीयात् इति प्रोर्णुनावकः स्वेदस्रमांगमर्दकंपवमी दवथवो व्यथा कंठे गात्रे च गुर्विती दं प्रलापकृत् स्य
जायते लिंगे ३०२ इति प्रलापः परिधावती वगात्रे रुक्पात्रे भुजापतंगहरी रागराः वेपथुमतः सदाह स्यैणा
दाहज्वरार्तस्य इत्यैणादाहः शब्दादीन धिगाछति न खान्विषयान्यदींद्रियग्रामः हसति प्रलपति पुरुषः सरो

योमूतद्दासार्त्तः ३०४ इतिमूतद्दासः छगलकशरीरगोधाःस्वेदरुजावान्निहन्ति गलरंध्रः अजघोषसन्निपाताद्दाताम्रा
क्षः पुमान्भवति इत्यजघोषः यस्यातिपीतमंगंनयनेसुतरांमलाश्चततोप्यधिकं दाहोतःशीततनावहिरस्यसहानिद्रको
ज्ञेयः ३०९ अथांतराद्धिशेषः रूक्षशीतदिवास्वापव्यायाममलनिग्रहात् कफात्संमूर्छितोवायुस्तीक्ष्णोपित्तंबहिः।
क्षिपेत् तत्पश्चाद्दूषयेद्रक्तंततोहारिद्रकोभवेत् भवेत्सादोपविष्टंभोवध्नात्यामाशयेहृदि ३०८ वेपथुःश्वसनंनेहि
काःतंद्राकासारुचिज्वराः गुरुत्वंसर्वगात्राणांशीतत्वंसर्वसंधिषु हारिद्रकांकितैर्हेतैःसन्निपातात्मकोज्वरः दोषे
विरुद्धेनवेगैस्तोसर्वसंपूर्णलक्षणाः ३०९ असाध्यःसोन्यथाकृच्छ्रोभवेद्वैकल्पदोपिवा प्रसंगाद्गात्रसंस्पर्शान्निःश्वा।
सात्सहभोजनात् ज्वराहारिद्रकाद्याश्चसंक्रमंतिनरान्नरं अष्टाहान्मनुजंहंतियदिसंपूर्णलक्षणाः ३१२ आदौवि
रेचनंकुर्याद्वंधयेच्चतदुत्तरं जलौकाभिर्विषाणैर्वामोक्षयेद्दुष्टशोणितं तथालोहेनसंदग्धंद्वयेदष्टकर्मवित् मध्य
दास्यघनंन्मूर्छित्रीन्वाएतद्वौगुलेदहेत् ३१४ मध्याघोदाहमेकंतुमध्याद्वाभ्यांतुयोजयेत् श्यामाभयाकरंजशुंठी
कंपिप्पलगुडद्युग्गुडीः पीताशीतजलेनाशुहरिद्रकविरेचनी हारिद्रेपाचनंप्रोक्तं द्राक्षामृत्निंबपर्पटैः ३१९ गुडूचीकटुका
रक्षोशीरवालुकसंयुतैः मूर्निवाद्यमृतानिवद्राक्षान्नायंतिकाथया मधुकग्रंथिककाथःक्षौद्राद्धारिद्रकंहरेत् वर्षा

भूपाटलोशीरदार्वीनिंबाभयामृता कटुकापर्पटश्चैव क्वाथो हारिद्रकापहः ३१९ श्वेतमूलशतावर्या वासा च कटुरो।
हिणी क्वाथो गुडसमायुक्तो हंति हारिद्रकंज्वरं लोहचूर्णं सितापथ्याशृंगीवासाहलसंभवं लोहं मधुसमायुक्तं हरेत् हारिद्र
कंज्वरं ३२० रसैः संहृत्य कटुतैलैः शिखितित्तिरदक्षिभिः शुष्कमूलककंजेयूषैः कुलत्थैः सह भोजयेत् ३२१ इति हारिद्र
कः मेचकवपुरति मेचकलोचनयुगलो विलोमलोमसर्गात् संशोषितः सितपिडिकामंडलयुक्तो ज्वरे भवति ज्व
रो दाहो भ्रमो मोहो ह्यतीसारो वमिस्तृषा अनिद्रा च मुखं रक्तं तालुजिह्वा च शुष्यति ३२३ कंठोष्ठमुखवैरस्यं पाकः।
खेदश्च जायते ग्रीवामध्ये च दृश्यंते स्फोटकाः सर्षपोपमाः एतच्चिह्नो भवेद्यस्तु स संधोरक उच्यते ३२५ ब्राह्म
णः क्षत्रियो वैश्यश्च शूद्रश्चांडाल एव च प्रथितः पंचधा वत्स यं संधोरकोगदः ब्राह्मणः श्वेतवर्णश्च क्षत्रियो रक्त
वर्णकः वैश्यः पीतश्च विज्ञेयः कपिलः शूद्र एव च ३२६ कृष्णवर्णश्च चांडालो नृणां प्राणांतकृद्भवः ब्राह्मणः
सुखसाध्यः स्यात्कृच्छ्रसाध्यो हि क्षत्रियः वैश्यः कृच्छ्रतरः प्रोक्तः द्वावसाध्यौ परौ नृणां श्लेष्मा श्वासो नरः कासश्छर्द्य
तीसारहिक्कहाः ३२७ संधोरकभवाश्चैते निघ्नंति सहसातुरं ॥ नामाश्विने योऽभगवंतमाहुः श्रुते निदाने भवतो दिवा
करः अस्योपतापस्य चिकित्सितं च पुनर्बभाषे स चरिष्मानवः ३३० एभिः प्रकारैर्बहुधानुरोपैः संधारकोवैशाम

तामुपैति सरुड्जाप्येस्तुतिभिर्भैवान्योमिष्टान्नभोज्यैर्द्विजपुंगवानां ३३१ किरातेन्द्रयवारिष्टत्वक्कोय घनपर्पटैः सविश्व
चेरनैःक्काथःकृतोमंधोरकंजयेत तेत्रीवृकीवातिविषामुस्तासुंठीचधान्यकं अहिप्रियंचामबिल्वंकलिंगोशीरपद्मकं
३३३ पद्मारजश्चसोहीच्यंशतपत्रीप्रसूनकं औषधानिप्रयोज्यानिश्लेष्मघ्नानिहिमानिच वक्ष्यमाणेनसूर्याद्विज्वरे
प्रोक्तःकषायकाः तेसर्वेत्रप्रशस्तव्याःसद्योमंधोरकापसः ३३५ इतिसंशोषणः अतिसरतिवमतिकूजतिगात्राण्यभि
तश्चिरंक्षिपति सन्यासस्सन्निपातेप्रलपतिभ्रूमध्यास्तिमंडलोभवति इतिसंन्यासः येनसहज्वरवेगाद्यंत्रेणोवाक्पी
डयतेगात्रे रक्तंपीतंचवमेद्यंत्रापीडःसविज्ञेयः ३३७ इतियंत्रापीडः अथरसाः रसेन्द्रविषशुल्वाभ्रलोहैर्वासारसंयु
तैः सप्तकृत्वाक्षिसैदोषांतकःप्रसोभैरवोमहान वल्लैकंवाडयंदद्याज्जातीफलानुपानतः रोगीवैद्योत्तमेस्त्यक्तःसोपिजी
वतितत्क्षणात सूतंगंधंशिलातालंमर्दयेन्निंबुकंजेद्रवैः लिप्तातेनार्कपत्राणियंत्रेभस्माभिधाख्यके ३४० ज्वालयेर
घयामाग्निस्वांगशीतंसमुद्धरेत विषोषणंतुर्यांशंदत्वावल्लमितंगुटी देवदालीरसैर्वध्वारसोयंभैरवाभिधः इत्यौद्र
करसैःसर्वसन्निपातविघातकृत ३४२ भस्मीगतंरसेविज्ञंचशीतार्त्तंनंद्रितंनरं तस्मरणाद्बोधयेद्धाघंकुर्याच्छीतोपचारका
न इतिलघुभैरवः काचमाच्यारसैःशुध्यात्कृत्वात न्वर्कपत्रकान गंधंकालशिलासस्तत्क्रमेणेकंद्विचन्द्रसः ३४४ ए

कीकृत्यांधमूषायां पचेद्यामचतुष्टयम् एकाग्निविषयेव्योषांस्तु कयोभाविता गुटी हरिमध्यमिता ज्ञेया रसोयं ताम्रभैर
कः संनिपातज्वरान् हंति पथ्ये शीतोपचारकान् ३४८ इति ताम्रभैरवो रसः विषार्क दरदं फेनं मरिचं पंचपित्तयुक् राजि
कामात्रया रघ्राद्रसं चैतन्यभैरवं सन्निपातान्निहंत्याशु घोररूपाननेकशः रसात्तापे समुत्पन्ने कुर्याच्छीतोपचारकान्
३४९ इति चैतन्यभैरवः रसांजनोषधैर्दीर्घैः कृतैः संज्ञानजायते शीतार्त्ते चांतके कण्ठकुब्जे हारिद्रजिह्वके अभिन्या
सेषु सर्वेषु नष्टसंज्ञ्यने रसः तर्कमनल्लै भार्गी व्याघ्रा छायाशुष्का तु सप्तधा ३५० सूचिकाभरणं सेवं प्रछन्ने मूर्द्धि दाप
येत् संनिपाते महाघोरे स्वैष्टैः सिंचेत्फलं मितैः दक्षिरो लोचने रक्ते साध्यो वामे त्वसाध्यकः पश्चात्सचेतनं तं तु यो
गैर्विषहरैश्चरेत् ३५२ इति सूचिकाभरणो रसः विषोषधैः पंचपित्तैर्हत्वा मङ्क्षमिता गुटीः ने पालेन युताचापि
रसो ज्वालानलो महान् शीतार्दिते सन्निपाते तंद्रिते मोहिते ज्वरे कफे कंठगते देयं स्मरणं ज्ञानगर्ति मानवः ३५४
इति ज्वालानलो रसः रसो विषोषणा कोष्ठ पंचपित्तयुता गुटी सन्निपातान्निहंत्याशु रसोयं अमृतभैरवः रंगाकागरले
भार्गी व्याघ्रा छाया शुष्का च सप्तधा सूचिकाभरणं सेनं प्रछन्ने मूर्द्धि योजयेत् ३५५ सन्निपाते महोन्यासे बद्धैः सिंचेत्फला
मितैः सन्निपाते समुत्तार्य यदि जीवति मानवः क्षीरोगोयो बलवान्साग्निः शीर्णगात्रः शिरोरुहः स्वरवर्णासमन्वितिभ्रष्टः

क्षीणश्चक्षीणेन्द्रियः ३५८ अव्यक्तवाग्विवर्णोश्चमंदाग्निश्च भवत्यसौ सन्निपातेन रुग्णश्चचिराद्दाप्यायते नरः ३५९॥
संभोजनीयश्चपुनर्जन्मरहितस्यततः ३६० ॐ इतिज्वरतिमिरभास्करे संनिपातज्वरप्रभेदोनाम सप्तमोऽध्यायः ॐ अ
थ आगंतुकज्वरप्रभेदः लोष्टशस्त्रकशाकाष्ठमुष्टिरंभितलद्विजैः तद्विधैश्चहतेगात्रे अग्निरग्धेष्पश्वेदजे १ जा
यते हि ज्वरोऽयस्य ज्ञेयोसावभिघातजः पाठांतरे येभूतविषवाय्वग्निक्षतभंगादिसंभवाः रागद्वेषभयाद्याश्चतेस्युरा
गंतवोज्वराः २ आगंतुरष्टमो योहि सज्वरः स्याच्चतुर्विधः अभिघाताभिषंगाभ्यामभिचाराभिशापतः ३ तत्राभिघात
जेवायुः प्रायोरक्तंविदूषयेत सव्यथं शोथवैवर्ण्यंसरुजं कुरुतेज्वरं ४ अभिघातज्वरेकुर्यात्क्रियामुष्णविवर्जितां कषा
यमधुरस्निग्धंतदैथ्योषमयापिवा ५ अभिघातज्वरस्तस्य पानाभ्यंगेनसर्पिषः मद्यैर्द्वैवैश्च सात्म्यैश्च तथामांसरसौ
दनैः ६ क्षतानां व्रणितानां च क्षतव्रणचिकित्सया वधबंधपरिभ्रंशभंगचेष्टनादिसमुद्भवान ७ ज्वरानुपाचरेत्पूर्वंमदिराक्षी
रभोजनैः ८ इति अभिघातज्वरः अभिषंगभवःसप्तप्रकारःकीर्तितोज्वरः ग्रहावेशात्तथाक्रोधात्सेषधैर्विषजःशुचः ९
कामाद्भयाच्चविज्ञेयस्तस्यलक्षणमुच्यते भूताभिषंगादुद्वेगोहास्यरोदनकंपने १० भूतविद्यासमुद्दिष्टैर्बंधावेशनता
डनैः जयेद्भूताभिषंगोत्थंतुलस्यषमरीचकैः ११ सहदेव्याजटांकंठेबध्वाभूतज्वरंजयेत इतिभूताभिषंगः दर्पणा

हिन्यथाछायाशीतोष्णप्राणिनोयथा स्वमणिंभास्करार्चिर्यथादिहंत्वदेहधृक् १२ विशंतिचनदृश्यंतेग्रहास्तद्वच्छरीरिणो
ग्रहजेमृतविद्योक्तंबलिमंत्रादिसाधनं १३ दानैस्तथास्वस्त्ययनैरक्ष्यातत्रग्रहपीडिताः शिरीषबिल्वजंबू(व्वा)म्लकपित्थार्जुनप
ल्लवैः सकुंकुमपुरैर्धूपःसर्वग्रहज्वरापहः १५ इतिग्रहजः क्रोधात्कंपशिरोरुक्चपित्तज्वरसमाकृतिः क्रोधजोयातिका
मेनसद्वाक्यैःपित्तजित्क्रमैः १६ मनोवांछितलाभैश्चसघःशांतिमवाप्नुयात इतिक्रोधजः औषधीगंधजेमूर्छाशिरोरु
क्तपथुःस्रवः वैगंध्यंवमनंकंपोभ्रमःस्यादितिलक्षणं १७ औषधीगंधजंपित्तशमनीयैरुपाचरेत निंबदारुकषा
यंवाहितंसौमनसंतथा १८ इत्योषधीगंधजः विषजेनृद्वक्तमोमूर्छामोहःश्यावास्यतारुचिः अतीसारोवमीश्चैववस्रा
त्वाचैवंचिकित्सयेत १९ विषजेशामयेत्क्षौद्रंविषपित्तप्रणाशनैः २० इतिविषोद्भवः पुत्रमित्रकलत्राणांधननाशेष
नाघ्रानंजंबनांकुरुतेपीरांसोसाध्योमानसोज्वरः २१ शोकाद्दक्वातिसरलोग्लानिश्चित्तभ्रमस्तमः प्रलापोवाष्पबहुलं
निःश्वासमितिलक्षणं २२ ह्रीवेरंचंदनोशीरंधान्याकंमुस्तकंसिता द्राक्षैरेभिः क्वतःक्वाथःशोकज्वरविनाशनः २३ मि
ष्टाशानेरुचिकरंव्यंजनैर्विविधैर्युतं गव्यंसेव्यंचधोलंचशेयंचित्तज्वरापहं २४ इतिशोकोद्भवज्वरः कामोद्भवेरुचि
र्दाहोह्रीर्निद्राधीधृतिक्षयः हृच्छ्वाथाध्माननिःश्वासोन्रणांकामज्वरेभवेत २५ हृद्यैःशीतोपचारैश्चचिकित्सेत्कामपीडि

ते सुरूपाचारुनयनापीनोन्नतपयोधरा । भोक्तव्या प्रमदा कामे कामज्वरनिपीडितैः २६ इति पुरुषे भ्रमोंगमर्दस्तंद्रत्र
चापल्यं कुचवक्त्रयोः स्वेदः स्याद् हृदि दाहश्च स्त्रीणां कामज्वरे भवेत् २७ बालकेशातपत्राणि गंधसारमुशीरकं । चोचेधा
नेयकं मांसीकाथः कामज्वरापहः २८ शय्यायां संस्तरः कार्यः सुगंधैः कुसुमैर्भृशं क्रीडनीयं स्वकांतेन सह राज्यो स्वया ।
स्त्रिया २९ इति कामजः भयात्प्रलापो तीसारश्चेतसश्चानवस्थितिः आश्वासनेष्टलाभेन वायोः प्रशमनेन च हर्ष
णैश्च शमं याति स यो भीतिभवो ज्वरः ३१ इति भयोद्भवाभिषंगज्वरभेदः शापोद्भूतज्वरे ज्ञेयं लक्षणं संनिपातवत् मोह
स्तृष्णारतिश्चैव विशेषेणाभिवर्द्धते ३२ वृक्षारामतडाकेषु देवतायतनेषु च गोब्राह्मणयतीनां च पीडां कुर्वंति ये नराः ते
षां देवप्रकोपेन विज्ञेयो दैविको ज्वरः इति शापोद्भवो दैविकः तत्राभिचारकैर्मंत्रैः क्रियामंत्रौषधैरपि प्रयुक्तैः पुरुषस्या
शुद्ध्यमानस्य तप्यते ३३ पूर्वं चेतस्ततो देहस्ततो विस्फोटतृड्भ्रमैः सदाहमूर्छनैस्तस्य प्रत्यहं वर्द्धते ज्वरः शापजो
देवकोपोत्थो ह्यभिचारभवो ज्वरः जपनात्पूजनाद्धोमाद्बलिदानादिकैर्जयेत् ३५ ॥ इति ज्वरतिमिरभास्करे आगंतुक
ज्वरभेदो नामाष्टमोध्यायः ॥ दोषोल्पोहितसंभूतो ज्वरोत्सृष्टस्य वा पुनः धातुमन्यतमं प्राप्य करोति विषमज्वरं १
संततादिविभेदेन ज्वरः पंचविधः स्मृतः संततः सततोन्येद्युस्तृतीयकचतुर्थकौ २ यत्रातततायीभवतीह्मायीसुच्चतविधे

घ्रातस्तत्कृचित्तः स संततेन ध्रुवं दुर्जयेन ज्वरेणानुष्ठितः सदोद्धरेण ३ स्रोतोभिर्विस्तृता दोषा गुरवो रसवाहिभिः सर्वदेहा
नुगाः स्तब्धा ज्वरं कुर्वंति संततं ४ यथाधातूंस्तथा मूत्रं पुरीषं चानिलादयः युगपच्चानुपद्यंते नियमात्संतते ज्वरे ५
स सप्ताहं वा दशाहं वा द्वादशाहं स्तु दुःसहः सशीघ्रं शीघ्रकारित्वात्प्रशमं याति हंति वा ६ विसर्गं द्वादशे कृत्वा दिवसेव्य
क्तलक्षणः दुर्लभो पिशमं कालं दीर्घमप्यनुवर्तते ७ पटोलेंद्रयवा दारु गुडूची निंबपल्लवैः क्वाथो हंति निपीतोयं।
सद्यः संततज्वरं ८ निंबामृताभयाद्राक्षापटोलेंद्रयवाः समाः शर्करामधुसंयुक्तः क्वाथो वा संततापहः ९ पटोलपत्र
कटुकी बीजानि कुटजस्य [redacted] वा एतैः प्रक्वथितः क्वाथः संततज्वरनाशनः १० नागरं सर्षपो मुस्ता तिलाश्चैरंडपल्लवाः
करवीरं जनी मोसी त्वक्चाग्रं शतपुष्पिकाः ११ शटी करंजमंजिष्ठा वाजिगंधोग्रगंधकं समभागान्वितं सर्वं मज्जाक्षी
रेण पेषयेत् १२ कोष्णं लेपनमेतस्य कुर्यात्सर्वज्वरे भिषक् सामे निरामे विषमे तथा चैव त्रिदोषजे १३ प्रशस्तं लेपनं
चास्य ज्वरिणां ज्वरशांतये इति संततः ज्वराः पंचमयो क्ताये पूर्वं संततकादयः चत्वारः संततं हित्वा ज्ञेयास्ते विषमज्व
राः १४ ज्वराश्च विषमाः सर्वे सन्निपातसमुद्भवाः यथोल्वणस्य दोषस्य तेषां कार्यं चिकित्सितं १५ श्लेष्मपित्ते विद
ह्येते रसस्थाने यदानिलः तस्मात्काले मनुष्याणां जायते विषमज्वरः १६ कस्यादनियतात्कालाच्छीतोष्णाभ्यां त

धैवच वेगतश्चाप्यनियमो ज्वरः सविषमस्मृतः १७ त्यक्त्वा स्वरूपमात्मीयं संततस्संततकाह्निकात कंठस्थानविभा
गेन यथासंख्यं करोति हि १८ संतता ऽन्येद्युष्कं स्यात्र्यख्यचतुर्थाऽन्यसप्रलेपकात आमाशयस्थः सततं स्युरस्थोऽन्येद्युष्कं संततनु
नेगलस्थः तृतीयकं मूर्द्धगतश्चतुर्थं स्थानमुपैति दोषः १९ आमाशये मरुत्स्थायादोषास्तिष्ठंति हि ज्वरे अत्यंतेतसम
वेती ह्स्तो द्वौ कालौ गतिरस्य तु २० पंचाशन्नाडिका भूत्वा आयंते पंच पंच च जहाति सज्वरो ज्ञेयः सततस्य विपर्ययः २१
पाठापटोलकटुकासारिवामुस्तकान्विता [illegible]तैःसिद्धः कषायस्तु संततज्वरघातकः २२ सारिवाद्धितयं पाठात्रायं
ती कटुरोहिणी शार्करमधुसंयुक्तः क्वाथो वा संततापहः २३ विषमे संतताद्दोयत्तज्वरे प्रोक्तं चिकित्सितं सक्कदुत्य
विपर्यासज्वरेपि च तदेव हि २४ इति सततज्वरः अन्येद्युष्कं ज्वरं कुर्याद्दोषो यः पिशिताश्रितः सत्वहोरात्रमध्येतु ए
ककालं प्रवर्तते २५ हृदिस्थितः कफप्रायो दोषो ह्यामाशये व्रजेत ज्वरं कृत्वा पुनर्याविशीभ्रं स्वस्थानकं प्रति २६ रा
त्र्यह्नोः षट्सु कालेषु एककालं विमुंचति सोन्येद्युष्कविपर्यासः कृच्छ्रसाध्यः प्रकीर्तितः २७ मृद्वीका त्रिफला निंब प
टोली मुस्तवत्सकैः कृतः क्वाथो निहंत्येषो ज्वरमन्येद्युरुद्भवं २८ पटोलारिष्टमृद्वीकाशंपाकत्रिफलामृता शार्करा
मधुसंयुक्तः क्वाथो वेलाज्वरापहः २९ मूलं श्वेतनुरंगाद्रिः काकजंबोद्भवं हिवा रवौ कु[illegible]मारिकासूत्रे बद्धं वेलाज्वरा

पदे ३० इत्यन्येषु पक्षः लोके वेलाज्वरः प्रणायतिस्तरो यश्च ज्वरो भस्मश्मशानप्रभृतिषु शिवस्य स्थानेषु ग्रहे वा लयेवा
प्रलपनमलमूत्रोत्सर्गनिष्ठीवनादिज्वर उत्तरवेगः पीडयेत्तं तृतीयः ३१ मेदोगतस्तृतीये ह्नि तृतीयकं इति स्मृतः ।
अस्थिमज्जाहं ज्वरयति मध्यं दिनं मुंचति प्रायः पित्तोद्भवः सोयं द्वंद्वजोन्यमते मतः ३३ कफपित्तात्त्रिकग्राही पृष्ठं वात
कफात्मकः वातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः ३४ दोषो धत्तेन कोष्ठस्थो हृदयं गच्छतस्ततः दिने नामाशयं
प्राप्य कुप्यतीतोतस्तृतीयकं ३५ ज्वरस्य विरतो वेगा यातिकंठेतु वेगतः मध्ये त्वेकदिनं भस्त्वाद्यो ह्रावं तेच मुंचति ३६ सत
तीयविपर्यासः कथितो वद्धसोश्नुते संठी गुडूची भूनिंबचंदनैरुपकल्पितः क्वाथो निहंति न चिरात्तृतीयाह्नभवं
ज्वरं ३७ समाक्षिकसितः पीतः शीतमुत्तमहेयश्वैः धान्यच्छिन्नरुहोशीरैः क्वाथ एकांतरं जयेत ३८ षोडशाष्टचतु
र्भागंवातपित्तकफार्तिषु क्षौद्रंकषायैर्दत्तं यं विपरीतां तु शर्करा ३९ पिप्पली चंदनं मुस्ता नागरोशीरधान्यकं शर्करा
मधुसंयुक्तः क्वाथ एकांतरं जयेत ४० अभया क्वथितः पेयः शर्करामधुयोजितः ज्वरेत्तृतीयके पुंसां तस्माद्दासमा
न्विते ४१ यजुर्वेदे रुद्रसूक्तं मन्त्रं जयं जपेत पुरःसिद्धार्थसर्पिषि गुग्गुलेनैकांतरं जयेत ४२ ज्वरस्य दिवसेर
वेरथ शिवस्य वा पिप्पलं जलेसमभिषिच्यैतं हरधिया समालिंग्य च प्रदक्षिणामवभ्रमन्नमनयामुङः ४३ अथ

यात्तृतीयकनिपीडितः सपदि शोमुदं विंदति ॥ रुद्रजटागोश्रृंगं विडालविष्ठोरगस्य निर्मोकः ४४ मदनफलभृत
केशीवंशत्वक् रुद्रनिर्माल्यं घृतयवमधूकचंद्रक छागलरोमाणि शर्षपाः सवचाः ४५ समरिचगुनिंबपत्राः सम
भागाश्छागमूत्रसंपिष्टाः धूपनविधिना शमयंत्येते सर्वज्वरान्नियतं ४६ ग्रहडाकिनीपिशाचप्रेतविकारापनोदनो
धूपः वृषलशैरेकविंशत्यात्र कुर्वीत तर्पणं मंत्रेणानेन विविधतिलपुष्पकुशान्वितैः ४७ ॐ नमो वो थिरूपाय वि।
स्णुरूपाय ते नमः ज्वरं हर महाभाग तृतीयं मम बाधकं ४८ ज्वरमेतेन संतर्प्य समाश्लिष्य निमंत्रयेत् महाज्वर महाभा
ग महाबलपराक्रमः ५० रौद्रासि रुद्ररूपोसि तृतीयक महाज्वर त्यजमां भूतमव्येश पिप्पले स्मिन् स्थिरो भव ५१
ज्वरमश्वत्थमूले त्वानन्मूले जलभृतं नवं कलशं आसिंचेत् कंबसंभृतशरावपिहितं ततो दद्यात् ५२ मंत्रोयं प्रग
हीष्य बलिं चेमां तृतीयमहाज्वर आतुरस्य सुखं सिद्धिं संप्रयच्छ महाबल ५३ अथैकविंशति विप्रान्सप्तवात्रीं।
यथासुखं भोजयित्वा गृहं गच्छेन्मौनी पश्यन्निर्जोपदेशे ५४ ततस्तु शंकरातंकाद्वीतो वै विप्रभोजनात् देहाच्छ
तिरोद्रायं त्रिविधो यं तृतीयकः ५५ मंडोलिकादंतकाष्ठे दातव्यैरविवासरे आमंत्र्य मंदसंख्यायां मतमेकोतरे ज्वये
त ५६ इति तृतीयकः लोके एकांतरज्वरः व्रजति यः सततेमकरध्वजप्रजनितो रुमतिभ्रममोहितः बहुविधाशुभधा

मज्जस्वलोमध्ये जनदुल्लिखितमपि पिवत्यपि ५७ हसति रोदिति चैत्यन्तरो रथः समलं मुञ्चति यः कुरुते पिच कुपितम् तम
वत्सवदितं ज्वरस्तमरमाश्रयतीह चतुर्थकः ५८ अधिशेते यथा भूमिं बीजं काले प्ररोहति अधिशेते तथा धातून् दोषः का
ले प्रकुप्यति ५९ सब्धो हि वलं कालं प्राप्य दोषस्तृतीयकं चातुर्थकं च कुरुते प्रत्यनीकवलक्षयात् ६० अस्थिमज्जा
गतो दोषश्चातुर्थकज्वरं सृजेत् शोषणः सर्वधातूनां वलवर्णाग्निसादनः ६१ दिनद्वयं यो विश्रम्य प्रत्येति स चतुर्थ
कः प्रायशः श्लेष्मजः प्रोक्तो ग्रंथांतरमथोच्यते ६२ ग्लानिपूर्वं मध्याधः कायं वाताद्भिः क्रमात् दोषाः शिरस्याद्यहे
ण कंठं प्राप्य ततः परं ६३ दिनेन हृदयं प्राप्य दिनेनामाशयं गताः चातुर्थकं ज्वरं कृत्वा विरमेयोऽतिमस्तके ६४ दिनमा
द्ये दिने चांते मुक्त्वा मध्ये द्व्यहं भवेत् चातुर्थकविपर्यासो दुःसहस्त्वस्थिमज्जगः ६५ धात्वंतरस्थो लीनत्वात् सूक्ष्मत्वाच्चो
पलभ्यते स चापि विषमो देहं न कदाचिद्विमुंचति ६६ वेगे तु समतिक्रांते गतोयमिति लभ्यते [redacted] ग्लानिगौरवदौ
र्बल्यकार्श्येभ्यो न विमुच्यते ६७ धात्रीधान्याभयावासास्थिरादारुसनागरैः सितामधुयुतो हंति क्वाथश्चातुर्थकं ज्व
रं ६८ गुडूच्यामलकीमुस्ता क्वाथो मधुसमन्वितः ज्वरं निवारयत्याशु चतुर्थदिवसंभवं ६९ विदारीक्षुरसं सर्पि
र्मधु तैलं घृतं पयः पिवेच्चातुर्थकश्वासकासवातज्वरापहः ७० त्रिफलाचूर्णमिश्रं वा पेयं चातुर्थकापहं अगस्त्य

ज्वरं
पत्रस्वरसैर्नस्ये चातुर्थकापहं ७१ कल्कं शिरीषपुष्पस्य रजनीमिश्रितं पुनः नस्यं सर्पिः समायोगै चातुर्थकं जयेत् ७२
शेलुषमंडनरजः पुरुषोनुरूपेषु भागवत्सतुरभीपयसानिपीतं आदित्यवारभवपालिदिनेन तथ्यं चातुर्थकं सुचिरजं
क्षययेत्सरोगान् ७३ अजाव्योश्चर्मरोमाणि वचाकुष्ठं पलंकषा क्षौद्रं गुग्गुलं निंबपत्राणि धूपश्चातुर्थकापहः ७४ इति
वहातुरआर्तेतहागमे यदि मिलष्यति तत्र कुवमर्पयेत् रुचिरचंदनपेचकमल्लिकाकुसुममांसमसूरान्नशरादिकं ७५
अथ धेनुदानविधिः असितधेनुमशेषपरिष्कृतं प्रविलसद्द्युतिमुज्ज्वलमलक्षणां द्विजवराय परीतसरीउनं प्रमुदि
तायहितायसदक्षिणां ७६ सकलसंसृतिदुःखहरं हरं हरं जिनसंतमसोर्ध्वहरं हरिं अहरहः प्रयतः स्वयमर्चयन्नय।
तिनाशमिमं विपदान्वयं ७७ अथ तृतीयचतुर्थकसंज्ञयो रुपशमाय विधिं ज्वरयोरिमं प्रविदधीत रवेर्दिवसे सु
धीरपहस्तीव करे पुरस्तत्वरे ७८ रुचिरमृण्मयकुंभकपालके सुचिरमुत्तमधूपसुगंधिनि प्रचुलपद्मगुतं कुशगंगु
दांसमिति पूर्वकपलेलकुचाम्रफले ७९ पदुपथक्र विरचय्य विभास्वरं शुभदिशो ज्वलदग्निशिखाधरं कमलकंडनिर्मि
तमल्लिका तम्रतं विदधीत च दीपकं ८० सुरभिशोणिततैः करवीरजैरपि जयाकुसुमैः कृतशेखरं निशितशस्त्रक
रस्तुतदुष्करं ज्वरखरायहिताय निवेदयेत ८१ मंत्रोयं प्राः ह्रीं यवबलिंचेमां बाधक त्वं महाज्वर आतुरस्य सुखं सिद्धिं प्र

यद्वाश्मसहास्वल ८२ हनुमतस्तपनेप्रणायेततःप्रततमुत्तमतैलघटीशतैः वरजयाकरवीरमंबैर्नैवैर्विरचितंप्रसवैः।
परिपूजयेत ८३ सुरभिधूपसदन्ननिवेदनाद्धनुपठेद्दृढभक्तिपरःस्तुतिं पवनसंभवमामव्यरुर्जयाद्दवलच्युतभयाद्दहितं
जहि ८४ अंजन्यास्तनयःसमीरणसुतोयःफाल्गुणोमोद्भवःश्रीरामप्रणयैकधामबलवान्सत्यप्रतिज्ञानिधिः पिंगा
क्षोद्भुतविक्रमोजलनिधेर्लंघनेधीरधीर्हेलोत्पाटितशैलशृंगघटितप्रत्युग्रसेतुस्थितिः ८५ लंकाधीश्वरदर्प
हाजनकजाशोकांतकृल्लक्ष्मणप्राणत्राणपटोजितेंद्रियगणःसश्रीहनूमान्भटः एतैर्नाममभिराद्दराद्धुबलिसंयमि
प्राक्षयेकीर्तितस्तेषामुत्तरसिद्धिदोक्षणाणगतोनित्यंतृतीयज्वरः ८६ हनुमंतमितिस्तुतिप्रसन्नेप्रणिपत्यप्रभुरान्तरा
नरूपं प्रविधायकपालभ्रष्टिकायंगृहमागत्ययथासुखंरमेत ८७ इतिचातुर्थिकः अतिशीतातिमंदत्वाद्भव
त्यह्नि पंचमे पिबेत्सपरकक्वाथंगडूच्यावासकस्यच ८८ त्रिफलास्वरसेवापिश्लेष्मिकेविषमेज्वरे चंदनेधान्यकं
मुस्ताङ्गडूचीविश्वभेषजं ८९ पंचाह्नसंभवंहंतिज्वरंक्वाथोनिषेवितः ९० इतिपंचाह्निकः अतिलीनतरश्चातिमं
दःषष्ठेह्निसंभवेत यवासोहैवजोह्यलसुंठीवासममांशतः ९१ क्वाथोनिषेवितोहंतिज्वरंषष्ठह्निनोद्भवं नित्यंमंदज्व
रोत्सन्नःअकृच्छ्रेणासिध्यति ९२ सत्वधांगश्लेष्मभूयिष्ठेनवातबलोसकीर्णोयस्तधांगताश्लेष्माधिकांय। रामः

स्निग्धरूक्षता ८३ मंदवेगो ज्वरो नित्यं स स्याद्वातबलासकः वातबलासमेके तु वदंति कुंभकामलां ८४ कफवातज्व
रे प्रोक्तं क्रिया वातबलासके इति वातबलासकः आमाशयस्थः संधिस्थो दोषः कुर्यात् प्रलेपकं प्रलिंपतीव योंगानि गो
रवेण तपेन वा ८५ ज्वरो मंदः सशीतश्च यस्मिन् स्यात् स प्रलेपकः तथा प्रलेपको ज्ञेयः शोषिणां प्राणनाशनः ८६ दुश्चि
कित्स्यतमो मंदः स कष्टो धातुशोषकृत् प्रयुंजीत भिषक्श्लेष्मज्वरघ्नीं तु प्रलेपके ८७ इति प्रलेपकः पुष्पेभ्यो गंध
स्तन्वी तेजस्विभ्यो पथ्यानलः उपादाय मनुष्यस्य प्राणान् पान्तो नियच्छति ८८ सोष्मा रक्तं सतेजो धातून्मर्माण्यपि च
तेजसा कर्मचित्तं बलं ज्ञानं से निरुध्याशु मारुतः ८९ कर्मादिषु निरुद्धेषु स्वपितीति स तु ह्यज्ञः मन्यते हतचित्तता
दोजस्युपरते सति ९० तस्यादितः शिरोरोगः ससंज्ञस्यैव जायते विषं गंधं स्तु गंधं च द्विषन्कासन्समर्द्धति ९१
तृणपुष्पकमित्येवं ज्वरं विद्याद्विचक्षणः ९२ इति तृणपुष्पकज्वरः ओजो विस्रंसते यस्य पित्तानिलसमुच्छ्र
यात् स गात्रस्तंभशीताभ्यां शयने भुरचेतनः ९३ अपि जाग्रत्स्वपं जंतुस्तंद्रालस्यप्रलापवान् संहृष्टरोमा स्रस्ता
ङ्गो मन्दसंतापवेदनः ९४ ओजो निरोधजं विद्यात् ज्वरं भिषगुत्तमः इत्योजो निरोधः वक्ष्यामि विविधा
न्योगान्विषमज्वरनाशनात् प्रयोक्तव्या मतिमता दोषादीनभिविभज्यते ९५ वातप्रधानं विषमं सर्पिर्भिः सा

ज्ञुवासरे । स्निग्धो स्नेहान्नपानैश्च शमयेद्विषमज्वरं १०६ विरेचनेन पयसा सर्पिषा संस्कृतेन च विषमेतिकृशीनैस्च
ज्वरं पित्तोत्तरं जयेत् १०७ वमनं पाचनं रूक्षमन्नपानं विलंघनं कषायोष्णं च विषमे ज्वरे शस्तं कफोत्तरे १०८ पटोलक
टुकामुस्ताविजयामधुकैः कृता त्रिचतुः पंचशः क्वाथो विषमज्वरनाशनः १०९ पटोलमधुकं मुस्तं मुस्तं तिक्तापटो
लकं तिक्तापटोलं मधुकं पथ्यातिक्तापटोलकं १११ प्रयोक्तव्या मतिमता दोषादीन् प्रविभज्य ते मुस्तापटोलम
भया अभयामधुकं घनं अभया कटुका मेघो मेघो यष्टी सरोहिणी पथ्यायष्टी सकटुका पथ्यायष्टीपटोलकं ११३
दृशैते त्रिकसंयोगा विषज्वरनाशनाः मुस्तं पटोलं मधुकं सतिक्तं तिक्ताभयामुस्तपटोलकानि पटोलपथ्यामधु
कोत्पलैश्च पटोलतिक्तामधुकाभयाभिः पयोदपथ्याकटुकासयष्ट्या चतुष्कयोगा [redacted] इति पंचशस्ताः ११५
तिक्ताभयामेघपटोलयष्ट्याः पंचात्मको यो विषमे प्रदिष्टः ४ द्रोणाग्रुष्णीजटो स्नुस्तो निःक्वाथ्य प्रपिबन्नुमान् उमाप
तिमनुध्यायन्मुच्यते विषमज्वरात् ११६ विश्वाद्यामलकी छिन्नाः स्तुशाकस्तासमाहिका विषमज्वरहृ [redacted] त्क्वा
थोयद्वा छिन्नावरावृषैः ११७ मधुसर्पिः सिताक्षौद्रसतसीरविलोडितः विषमज्वरहृद्रोगश्वासकासक्षयाप
हः ११८ त्रिपंचसप्तमगधाः प्रयुंचपयसा सह हः पिबन्द्धध्याक्रमान्नीरुक्पित्तवातकफामयी ११९ यावत्पूर्णो रामः

शतेनत्स्यान्नोस्तथैवापकर्षयेत वातास्त्रश्वासपांडुर्शोगुल्मशोफोदरापहं १२० विषमज्वरेषुतद्धृयंपिप्प।
लीवर्द्धमानकं अस्त्रधात्र्यभयाहंतित्रिफला विषमज्वरं १२१ गुडेनसहिताक्वापिक्वापिदुग्धेनसंयुता सैते
लेलशुनंवातेविषमज्वरनाशनं १२२ रसोनवीजंसंध्यायांतैलमध्येविनिक्षिपेत प्रभातेछ्रतसंयुक्तंसेवितंज्वरवा
तनुत १२३ पयसावृषंचदुस्पर्शाशालाहेगागमेपिवेत गोमयोत्थरसोपेतंपयोवाप्यथविश्वयुक् १२४ पक्वंपीत
मजाक्षीरंविषमज्वरनाशनं सगुडंजीरकंरवादेद्दभयांवागुडान्वितां १२५ गुडूचीमुस्तधात्रीणांक्वाथोवाविषमंज।
येत सैंधवंपिप्पलीनांचतंडुलाःसमनःशिलाः नेत्रांजनंतैलपिष्टंशस्यतेविषमज्वरे १२७ चिरपोटीजयाहस्तेव
छासर्वज्वरापहा सहदेव्यावचाभद्रानाकुलीभिःप्रलेपनं मरेहोद्धर्तनेकुर्यादेभिर्वाविषमापहं १२८ निंबपत्रेवचा
कुष्ठंपथ्यासिद्धार्थकंघृतं विषमज्वरनाशायगुग्गुलंचेतिधूपनं १२९ ज्वरवेगोग्रकालेचचिंतयन्त्वर्यतेनुयः तस्ये
षरड्डतैर्वापिविचित्रैर्नाशयेत्स्मृतिं १३० निर्विषैर्भुजगैर्नागैर्विनीतैःकलतस्करैः त्रासयेदागमेचैनंतदहर्भोजनेन
च १३१ सततंविषमंवापिक्षीणस्यसुचिरोत्थितं ज्वरंसंभोजुत्तैःपथ्यैर्ज्वरघ्नैःसमुपाचरेत १३२ ज्वराःकषायैर्व
मनैर्लंघनैर्लघुभोजनैः रूक्षस्ययेनशाम्यंतिसर्पिस्तेषांभिषग्जितं १३३ शुंठीकणाचित्रकंचव्यंग्रंथिकमेवच

कुर्यात्पंचपलान्भागानेकैकस्यसकुद्दिमान १३४ जलद्रोणेविपक्तव्यंयावत्पादावशेषितं एतैस्तुपलिकैः क
ल्कैः सैंधवेनसमन्वितैः १३५ षट्पलंनामविख्यातंविषमज्वरनाशनं कासश्वासाग्निदौर्बल्यंघृतमेतद्व्य
पोहति १३६ षट्पलंघृतं चंदनंचित्रकंसिंहीवत्सकंमुस्तनागरं कटुकात्रायमाणाचधात्र्युशीरेद्विसारिवे
१३७ द्रव्यार्धपलमात्राणिसोम्यवारिचसंहरेत् क्षीराढकेनसंयुक्तंसर्पिषोष्टौतुलाःपचेत १३८ चातुर्थकं
हरत्याशुउन्मादंविषमज्वरं श्वाहिकंश्वासकासेचसर्वापस्मारनोदनं १३९ इतिचंदनाद्यंघृतं सुक्कारना
लंदधिमस्तुतक्रंफलाम्लभागेनसमंहितैलं कल्काद्विकल्कैर्मधुवह्निसिद्धमभ्यंजनेवातकफज्वरा
णां १४० एकाहिकंद्वित्रिचतुर्थकानांमासार्द्धमासद्वयमासिकानां निवारणंतद्विषमज्वराणांस्नेहादिभिर्द्वित्रि
ककद्दरंस्यात १४१ महाकटुरंतैलं पुरावातज्वरेप्रोक्ताःशीतभंजीरसोऽस्[redacted]यः समाषप्रमितोदेयोनाग
वल्लीदलान्वितः १४२ एकाहिकंद्व्याहिकंवात्र्याहिकंवाचतुर्थकं विषमंवात्रिदोषंवाज्वरंहंतिनसंशयः १४३
शीतमंजीरसः शुद्धंसूतंविषंगंधंधत्तूरबीजंत्रिभिःसमं सर्वतोद्विगुणंव्योषंमर्द्यंजंबीरकद्रवैः १४४ दद्या
द्गुंजमात्रेणज्वरेनागमहांकुशं एकाहादींस्तुसर्वांस्तान्ज्वरानशीघ्रंनिहंतिवै १४५ इतिमहाज्वरांकुशः

॥ इति ज्वरतिमिरभास्करे संततादिविषमज्वरभेदो नाम नवमोऽध्यायः ॥ अथातः शीतदाहाद्या ज्वरा ये द्वंद्व
जाः स्मृताः विषमास्तेऽपि विज्ञेयास्तेषां भेदान् पृथक् शृणु १ ये पूर्वजन्मसु जनाः पिशुनान्नृशंसाः संसारिणा
स्तु दुःखजुषो भवंति शीतज्वरेण च भृशं परिबाध्यमाना नानाविधां जगति दुर्गतिमाप्नुवंति २ बलासो वायु
ना युक्तः शीतादीन्स्वरहे ज्वरे जनयेन्नयनस्रावं हृल्लासं मधुरास्यतां ३ गर्भभूवेश्मशयनं कुथकंबलरल्लका
न निर्धूमदीप्तैरंगारैर्हसंतीश्च हसंतिकाः ४ धान्यस्थारिष्टतिक्ताभिः शीतवर्मभस्त्रकैः क्वाथः शीतज्वरं हंति
एकद्वित्रिचतुर्थकं ५ द्रोणपुष्पीरसः पीतः पयसा शीतमुल्वणं हरेन्मासिकसंयुक्तो वार्ताकस्वरसोऽथवा ६
मधुकानखल्लता गुरुप्रपीतेन मधुं मधुयुक्हरति प्रसभं शीतं गदहरं मधुदूतिका गुडूची सहचरशक्रयवाग्निसे
येकं वा ७ क्षुद्राधान्यकशुंठीभिर्गुडूचीमुस्तपद्मकैः रक्तचंदनभूनिंबपटोलवृषपौष्करैः ८ कटुकेंद्रयवारिष्ट
भार्ङ्गीपर्पटकैः समैः सिद्धः क्वाथो हरेदाशु शीतज्वरमतिव्ययं ९ एलाजातीफलं व्योषं त्रिफलाजीरकं घनं स
विडंगं सितायुक्तं चूर्णं शीतज्वरापहं १० अतस्यकाकजंघाया पंचांगस्य प्रदीयते वातशीतज्वरं हंति क्वाथ
स्तन्मूलजोऽथवा ११ काकस्थानाकुलीतिक्तावयस्याप्रस्नोचकैः सहदेववचाकुष्ठैर्लवणास्तारसंयुतैः १२ स

मैलेर्विपाचितं तैलमभ्यंगाच्छीतनाशनं १२ शीतज्वरस्य सुरसार्जकशिग्रुपत्रलेपः कवोष्णसलिलेन शमाय सद्यः से
कल्लुषां तुलसभीजलमस्तु सुक्षैरभ्यंजनं चलवणोन्नमसुक्ततैलैः १३ शीतज्वरे शिलातैललेपनं परमौषधं हिंगुसैं
धवसंयुक्तेन स्यंजीर्णं घृतान्वितं १४ मुनिपत्ररसान्नस्यं मधुतक्रसमुद्भवात् मरिचेन समायुक्तं देयं शीतज्वरा
पहं १५ रसगंधशिलातालताम्रमेकत्र निर्मितं पुटेन पाचयेदारु कारवेल्लीरसैरलं १६ भावयेद्दन्तीरेणासप्रक्त
त्वस्तु तद्रजः शीतज्वरं हरेत्स यो मरीचसुरसारसैः १७ इति शीतारिरसः निंबनेपालजे बीजैर्व्योषाग्रालसुनैः
समैः कारवेल्लीरसैर्भाव्यं नस्याच्छीतज्वरं हरेत् १८ मरिचं सप्रधा भाव्यं कारवेल्यारसैः स्रुतं तेन नेत्रांजनात्तथा
निशीथं शीतभवो ज्वरः १९ सहस्रसंख्यैः कलशैः सुतीर्थतोयाभिपूर्णैः स्नपयेत्पुरारिं अभ्यर्चयेच्चंदनपुष्पधूपै
र्दीपैः शुभैर्वीक्षणाभोजनैश्च २० जप्त्वाथ जातवेदस मष्टाधिकमयुतमालये विष्णोः हुत्वाचत द्दशांशं शीतज्वर
तो विमुच्यते जंतुः २१ महेशमेवमभ्यर्च्य मुच्यते तिमहागदात् आधयस्तेन बाधंते व्याधयः केल्यसाधनाः २२
इति शीतज्वरः पंसत्फलेषु शुभकर्मस्तु कोपनः स्यात्तस्यानिलः प्रतितटः समुदेति देहे दाहज्वरस्तमपहर्तुमलं
तदंगाङ्गगाधरा धियुगपज्जरजः प्रसादः २३ अन्यच्च संनिपातोत्थो यत्र पित्तं प्रयकस्थितं त्वचिकोष्ठप्रवाहादं एम्नः

विद्धातिपुरोतुषं २४ योवरीतः पित्तस्रोदोषोपक्रमरोगक्रमः तं वशीलयतः शीघ्रं सदाहोन स्यपतिश्वरः २५ स्वादुतिक्तक
षायारां क्वाथैः स्याच्छर्करायुतैः सुशीतैः शमयेत्तृष्णां प्रवृद्धं दाहमेव च २६ तथारनालसलिलक्षीरस्तक्रघृतादि
भिः कपित्थमातुलुंगाम्लविदारीरोद्रदाडिमैः २७ बदरीपल्लवोत्थेन फेनेनारिष्टकस्य वा लिप्तांगो दाहरहक्क्रमोरहु
द्दिं तृष्णा च शाम्यति २८ दाहे सहस्रधौतेन सर्पिषाभ्यंगमाचरेत् सिताज्यमधुरवर्जैः रस्मृद्वीकाभिः शृतं पयः २९
शीतं मधुयुतं पीतं तृड्दाहज्वरनाशनं नागरं देवकाष्ठं च धान्यकं बृहतीद्वयं एतत्क्वाथस्य पीतेन याति दाहज्वरः श
मं ३० धान्यकं स्य चतुःक्षीरं क्षीरस्य द्विगुणं जलं क्वाथं क्षीरावशेषं च तत्तत्पेयं सशर्करं ३१ उग्रज्वरं निहंत्याशु मंदा
ग्निविषमज्वरान् हर्म्यपृष्ठाभ्रसंकाशे शशांककरशीतले मलयोदकसंसिक्ते सुप्याद्दाहज्वरार्दितः ३३ नाभ्या
मुत्तानसुप्तस्य गंभीरां कांस्यभाजने शीतांबुद्धस्वधारां दत्वा दाहं निवर्त्तयेत् ३४ इति दाहज्वरः त्वक्स्थौ श्लेष्मानि
लौ शीतमादौ जनयतो ज्वरं तयोः प्रशांतयोः पित्तमंते दाहं करोति च ३५ पटोलकटुकापथ्यायष्टिबद्धैः स्वाथितं ज
लं शीतदाहज्वरं हंति विवरात्रिन्नावशेषेरथ ३६ इति शीतदाहज्वरः करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च तस्मि
न्प्रशांते त्वितरौ कुरुतः शीतमंततः ३७ दाहशीतज्वरं हंति सितातिक्तावुकल्किता पटोलधान्ययोः क्वाथः सगुडो

श्रीगुरुः

३८

ऊर्ध्वमुष्णमधःशीतं स्यान्नृसिंहशरीरवत् व्य
वमीरता दाहएसैरं कषायतः १

ज्व·नि·भा वाम्रतारसः ३८ इति दाघशीतज्वरः यस्योर्ध्वगं रक्तपित्तं मध्ये वातकफौ ततः ऊर्ध्वो ष्णमधःशीतं ज्वरं पीतो व्यपोह
ति ३९ इति ऊर्ध्वोष्णाधःशीतज्वरः विदग्धेन्न रसे देहे श्लेष्मपित्ते व्यवस्थिते अर्द्धे शीतमर्द्धमुष्णमर्द्धनारीश्वरास्मृतिः
४० अर्द्धशीतार्द्धोष्णज्वरः कायेदुष्टं यदा पित्तं श्लेष्मा चांते व्यवस्थितः उष्णत्वं तेन देहस्य शीतत्वं करपादयोः ४१ पित्त
ज्वरोक्तं द्राक्षादिक्वाथं तत्र प्रयोजयेत ऊष्णगात्रशीतकरपादज्वरः कायेश्लेष्मा यदा दुष्टः पित्तं चांते व्यवस्थितं शीतत्वं
तेन गात्राणामुष्णत्वं करपादयोः ४२ पूर्वोक्तमत्र रास्नादि प्रयुंजीत भिषग्वरः ४३ इति शीतगात्रोष्णकरपादज्वरः
मध्ये पित्तं यदा तिष्ठेद्बाह्ये श्लेष्मसमीरणौ तदान्तर्दाहशोषः स्याद्बहिः सर्वं शीतता ४४ अंतर्दाहे बहिःशैत्यं छिन्ना
क्वाथः कणामुक्तः पाययेद्वाथ तं क्षीरं शीतं गुडसितायुतं ४५ इत्यंतर्दाहबहिःशैत्यज्वरः बाह्ये पित्तं यदा तिष्ठेदंतेनु कफमा
रुतौ तेनोष्णत्वं शरीरस्य अंतःशीतं च जायते ४६ अंतःशीते किराततादि पित्तोक्तः पिप्पलीयुतः इत्युष्णशरीरांतःशीतज्वरः
कफवातौ समौ यत्र हीनपित्तस्य देहिनः तीक्ष्णो वाथ दिवा मंदो जायते रात्रिको ज्वरः ४७ दिवाकरातपवले व्यायामादुप
शोषिते शरीरे नियतं वाताज्ज्वरः स्याद्रात्रिगः ४८ छिन्नाक्वाथः कणाचूर्णयुतो रात्रिज्वरापहः ४९ क्षीराविकाज्व
रध्निर्दैन मन्त्रयाणां मूलं ज्वरापहमवश्यमिदं शिखायां बद्धं दिवाकरदिने षष्ठ्यां वाष्टम्यां रात्रिज्वरं हरति दर्जित मन्त्र राम:

३८

वद्धं ५० लज्जामल्लं शिखावद्धं रवौ वा चाष्टमी दिने मर्दनं चाविदुग्धेन रात्रिज्वरहरं परं ५१ नीत्या वा काकमाच्यावा
भृंगराजजरायवा करोविच्छान्नसंदेहः सघोरात्रिज्वरापहा ५२ गंगायमुनयोर्मध्ये अपुत्रस्तापसोमृतः तेः रात्रिज्व
रविनाशाय तस्मै दद्यात्तिलोदकं अर्द्धं प्रदापयेत्तस्मै मुंचेत्तं च त्वरेत्सुधीः ५३ करकं जलपूर्णं च पूपकोपहितं तत।
तः चतुर्मुखं पिष्टदीपं धत्वा रोत्री समाचरेत ५४ तिलाक्षितपूर्णं तत्रमंत्रेणानेन पापयुक् दीपः करकोत्तरिका
चवह्निमौत्याज्वरो याति ५५ इतिरात्रिज्वरः अथ रसाः रसगंधकयोर्भागौ शुल्वयोरुभयोरपि त्रिकटुत्रितयं चे
वएकैकं वह्निभृंगयोः आकल्लकरभागेकमेकं स्फारिकरंकरांग्रानल्पस्यवत्सगोनोस्य भागादितय संयुतं ५७
साररसात्त्वा हिपेरोस्य दत्वा पादं विचूर्णयेत दिनानि सप्त संशाव्य भृंगराजरसेनतु ५८ नेपालजातनीरेण
दिनैकं भावितं कुरु वल्लमात्रं प्रकुर्वीत गुटिकां तज्जलेन हि ५९ नेपालेन विटीनेतु अपक्वमल्लजे ज्वरे सपक्व
मल्लजे दद्यान्नेपालजलभावितं ६० सत्तोनैव ज्वरो याति मल्लपातः सुरेश्वरः चापडी षष्टि मात्रेण ज्वरारि।
नाशयेज्ज्वरान् ६१ षष्टिकान्नं प्रदातव्यं पथ्यं दधि सुशीतलं उत्पन्ने परितापे तु जनं ज्वरनिपीडितं ६२ सर्वम
नप्रसन्नात्माज्वरारिमसृजद्विभुः अमोघवीर्यमेनं तु सुरासुरनिपीडिते आराधयति यो वैद्यः सज्ज्वरैर्नोभि

श्रीगुरुः

३८

ज्व॰ ति॰ भा॰

भवते १४ स्वल्पिकापाटिकोरसः ॥ इति ज्वरतिमिरभास्करे शीतदाहप्रभेदकथनं नाम दशमोऽध्यायः ॥ रसा
सृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः क्रमात्तेषु ज्वराणां च वक्ष्ये लक्ष्म चिकित्सितं १ उत्क्लेशो गौरवं दै
न्यं भंगो गात्राणां विजृंभणं अरोचको वमिः सादो भवंति रसगे ज्वरे २ रससंस्थे तु सर्वस्मिन् जायेद्वमनलंघ
नं इति रसगतः रक्तनिष्ठीवनं दाहो रक्तोत्थपिडकोद्गमः दाहरागभ्रममदप्रलापो रक्तसंस्थिते ३ सेका
संशमनालेपरक्तमोक्षोस्रजि स्थिते ४ इति रक्तगतः पिडिकोद्वेष्टनं तृष्णासदस्मूत्रपुरीषता ऊष्मांतर्दाह
विक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे ५ इति मांसगतः मांससंस्थे स्रसवेषाम मूर्छाप्रलापौ विरेचं च दीर्घ्या रोचको
ग्लानिर्मेदस्थे चासहिष्णुता ६ तीक्ष्णाग्निरेकान्मांसस्थे दोमे धूमेदसंस्थिते इति मेदगतः मेदोस्थ्याकूज
नं श्वासो विरेकच्छर्दिरेव च विक्षेपणं च गात्राणामेतदस्थिगते ज्वरे अस्थिस्थे वातशमनमभ्यंगस्वेद द
र्शनं ८ इत्यस्थिगतः तमःप्रवेशनं हिक्का कासः शैत्यं वमिस्तथा अंतर्दाहो महाश्वासो मर्मच्छेदश्च मज्जगे ९
मज्जगे निलशमनं विशेषाच्च स्निग्धमेव च अथ वाभिषजे योज्या निरूहाः सानुवासना १० इति मज्जगतः तम
सो दर्शनं मर्मच्छेदः स्तब्धगात्रता शुक्रप्रवृत्तिर्मृत्युश्च जायते शुक्रसंस्थिते ११ उत्तरोत्तरदुःसाध्याः पंचात्री। रामः

३८

त्योनुवर्जयेत मज्जशुक्रेक्रियान्नोक्तामरगोचात्रभाषितं १२ रसरक्ताश्रितौसाध्यौमांसमेदोगतस्त्रयः अस्थिमज्ज।
गतःकृच्छ्रःशुक्रस्थोनैवसिध्यति १३ इतिशुक्रगतः देवीसहस्रकलिंगालोहितलतांशपाकपाठासदीशोंडीवीरकि
रातकुंजरकणागुत्रायंतिकापप्रकैः वक्राधान्यकनागराद्दसरलासिगुंद्रबृहतीसिंहीशिवाव्याघ्रीपर्पटदर्भमूलकटु
कानंतामृतापुष्करैः १४ धातुस्थंविषमंत्रिदोषजनितंचैकाहिकंद्व्याहिकंपीतोहंतिनिरतीयकंज्वरमलंचातुर्थ्य।
कंम्भतजे मूर्च्छाशीनमदोग्रसहमहाचिंष्मासंचकासंतथापांडुशोफमहाप्रलापशमनःकाथोमृतःकल्पितः १५
लक्ष्मरोत्स्नवर्यथान निंबपत्रंवराव्योषंयवानीलवणत्रयं सौरोदिग्वह्निरामेषुत्रिद्विःस्यात्क्रमशोंशकान
१६ सर्वमेकीकृतंचूर्णंप्रत्यूषेभक्षयेन्नरः एकाहिकंद्व्याहिकंचतथात्रिदिवसज्वरं १७ चातुर्थकंमहाघोरंसंततंस
ततंदिवा धातुस्थंचत्रिदोषोत्थंज्वरंहंतिचमानसः १८ इतिनिंबादिचूर्णं सोंप्राहिगुणितंसर्पिर्द्धंताहिगुणं।
पिप्पली पिप्पल्याद्विगुणाचात्रसितादेयासुशोभना १९ सितायाद्विगुणंक्षीरंक्षौद्रेणैवसमंक्षिपेत चातुर्जा
तकमत्रापिपलोकुर्यान्मोदकान्नर २० रसास्थ्यामसमेदोस्थिस्थितंनाशयतेज्वरं कासंश्वासंतथापांडुंवह्निमां
द्यमरोचकं २१ धातुक्षयंनाशयतिधातुपुष्टिंकरोतिच बलेंद्रियबलंकुर्यात्पिप्पलीमोदकःसदा २२ इतिजी

श्रीगुरुः

५

ज्व·ति·भा· रोज्वरेपिप्पलीमोदकः त्रिफलारजनीयुग्मंकंटकारीद्वयंशटी त्रिकटुग्रंथिकंमूर्वागुडूचीधान्ययासकः
२३ कटुकापर्पटोमुस्तात्रायमाणाचवालकं निंबःपुष्करमूलंचमधुयष्टीयवासकं २४ यवानींद्रयवाभा
किराततिक्त व चा
र्ङ्गीशिग्रुबीजंसुराष्ट्रजा बासात्वकपद्मकोशीरंचंदनातिविषाबला २५ शालिपर्णीपृष्ठिपर्णीविडंगंतगरं
तथा चित्रकोदेवकाष्ठंचपटोलंपत्रचव्यके २६ जीवकर्षभकौचैवलवंगंवंशलोचना पुंडरीकंचकाकोली
पत्रकंजातिपत्रकं २७ तालीसपत्रंचैतानिसमभागानिचूर्णयेत् सर्वचूर्णस्यचार्धांशंप्रक्षिपेद्भूनिंबकं
२८ एतत्सुदर्शनंचूर्णंदोषत्रयनिबर्हणं ज्वरांश्चसकलान्हंतिनात्रकार्याविचारणा २९ पृथक्द्वंद्वागंतुजांश्च
धातुस्थान्विषमज्वरान् सन्निपातोद्भवांश्चापिमानसानपिनाशयेत् ३० शीतज्वरंतथैकाहद्व्याहितीद्विषमज्वरा
न्प्राकृतंवैकृतंचैवसौम्यंतीक्ष्णंतथापिवा ३१ नानादेशोद्भवांश्चैववारिदोषजमेवच तृषांतंद्राभ्रमंमोहंपांडु
हृद्रोगकामलां ३२ त्रिकपृष्ठकटीजानुपार्श्वशूलंचनाशयेत् शीतांबुनापिबेच्चूर्णंसर्वज्वरनिवृत्तये ३३ य
थासुदर्शनंचक्रंसर्वदानवनाशनं चूर्णमेततथासर्वज्वराणांनाशकारकं ३४ इतिसर्वज्वरेसुदर्शनचूर्णम्
किराततिक्तकंतिक्ताछिन्नायासाभयाघनाः त्रायंतीनागरंव्याघ्रीमेघिकंपर्पटंकणा ३५ सदीपटोलवाक्षाकं रामः

५०

चूर्णोयं षोडशांगकः जीर्णज्वरे वापि विषमे सन्निपातेथ धातुगे ३६ श्वासे हृच्छौ शूले मन्त्रकृच्छ्रे हृद्रामये विषेष्टी।
ह्रिव मोशास्तं मृद्वातानुलोमनं ३७ ग्रहणीशोषश्वो फाण्डुवस्तिशूलं प्रवाहिका हन्त्यनीसार श्लीपदीर्ति।
त्रिकपृष्ठकटिग्रहान् ३८ पीनमस्तामितं चोष्णतोयैः सर्व्वज्वरापहं इति षोडशांगचूर्णं पथ्यौषधैः शमं याति विरु कवी
द्धसेवनेन चेत् ३९ ज्वरश्चिकित्सितः सम्यग्धातुस्थोग्रवेगवान् ४ छिन्नास त्वं शिवाज्जाती हस्त्वाग्निः कटु
लभया साकं शाराभिताकार्यां गुडैर्वा मधुनागुटी ४१ धातुस्थान्विषमाञ्जीर्णान्ज्वरानेकाहिकद्विकान् रा
संश्वासाग्निमांद्यं च हंति दुग्धानुपानतः ४२ इति पोषसुंदरीगुटिका ❈ इति ज्वरतिमिरभास्करे सप्रधा
तुगतज्वरोपक्रमो नामैकादशोध्यायः ❈ नशाम्यति ज्वरोयस्य पक्ष्माद्वादश्विसप्तकान् मंदवेगानुबंध।
तुच्छमनी वक्तुतां गतः १ देहधातुबलत्वेन सज्जीर्णो ज्वरउच्यते स्त्रीहाग्निसादं कुरुते वक्ष्ये नस्य चिकित्सितं २
सेषारोणपद्यभिव्यक्तिं नरः रोपि भवे ज्वरे लंघयीतनकः पश्चाद्यष्योत्मो कारयेत्क्रियां ३ दौर्बल्याद्देहधातूनां
ज्वरोजीर्णोनुवर्त्तते बल्यैःसबृंहणैस्तस्मा द्वाहारैस्तमुपाचरेत् ४ द्राक्षामृताशटीश्रृंगीमुस्तकं रक्तचंदनं
नागरं कटुकापाठाभूनिंवं सदुरालभं उशीरं पद्मकं धान्यं वालकं केरकारिकं ५ पुष्करं पिचुमंदश्च दशाष्टांग

क्षीरकासारोचकनाशनं पिप्पलीचूर्णसंयुक्तः
क्वाथश्छिन्नरुहोद्भवः जीर्णज्वरकफ ९

ज्व·ति·भा· मिदंशुभं जीर्णज्वरारुचिश्वासकासश्वयथुनाशनं ६ पिप्पलीमधुसंमिश्रंगुडूचीस्वरसंपिबेत् जीर्णज्वरकफ
ध्वंसी पंचमूलीकृतोथवा ७ अमृतायाः कषायस्तु सतैवेवसुशीतलं मधुपाकयुतंपीतंजीर्णज्वरहरंपरं ८ त्रि
फलापिचुमंदस्वममधुकंबृहतीद्वयं समस्तैरर्द्धलैः क्वाथः सद्योतोज्वरकासहा ९ पिबेत्तोयंचरोहीतपथ्यापर्पटकैः शृ
तं ज्वरघ्नीहेरश्वासयकृद्गुल्माग्निमांद्यजित् १० धान्यसुंठीसमंचूर्णंतत्सोसहंचनाशयेत् ११ क्वाथश्छिन्ना
रुहोद्भूतोनिहंतिविषमज्वरं जीर्णज्वरंतात्रिजंवातृतीयकचतुर्थकौ १२ इतिक्वाथः क्षीरेणकफेज्वरेजीर्णेस्वल्पदोषे
पिपासिते पित्तानिलोद्भवर्चोःस्तंभे सैनेतथाक्रशे १३ रुहातैंचपयोयोज्यंतन्नवेविषवद्भवेत् संस्कृतंशीतमु
ष्णंवातस्माद्धारोष्णमेववा १४ विभज्यकालेभुंजीतयथास्वैरौषधैःशृतं पयःशुंठीसखर्जूरंमृद्वीकाशर्कराघृ
तं १५ शृतंशीतंमधुयुतंतत् दृदाहज्वरनाशनं द्राक्षाद्वगुणंक्षीरंक्षीरान्नोयंचतुर्गुणं १६ क्षीरावशेषंकर्त्तव्यंक्षी
रपाकेत्वयंविधिः अश्वीचबिल्ववर्षाभूःपयश्चोदकमेवच १७ क्षीरावशिष्टंतत्पीतंभवेत्सर्वज्वरापहं पंचमू
लीशृतंक्षीरंपिप्पल्यावापितत्सृतं १८ शिंशिपाषोडिकाभिर्वाधारोष्णंवाज्वरापहं उदकांशाष्टकःक्षीरेशिंशिपासा
रमेवच १९ तत्क्षीरशेषंक्वथितंपेयंसर्वज्वरापहं त्रिकंटकवलाव्याघ्रीगुडनागरसाधितं २० वर्चोमूत्रविबंधघ्नं शमः

शोफज्वरहरं पयः गुडविल्वकणाशार्ङ्गीश्वदंष्ट्राभिः शृतं पयः २१ अपत्रुज्वरविमुक्तस्रविबंधोपशमं व्रजेत साधितं वि
ल्वपेशीभिर्म्मलेनेरंडकस्यवा २२ सद्यो हंतिपयः पीतं ज्वरं सपरिवर्त्तकं कासश्वासानशिरःशूलान्पार्श्वशूलंचिरज्व
रान् सुच्छाभेज्वरतः पीत्वापंचमूलीशृतं पयः २३ धारोष्णं वापयः पीत्वाविबंधानिलवर्च्चसः जीर्णज्वराणां सर्वेषां पयः
प्रशमनं परं २४ कणामधुकमृद्वीकावत्साचंदनसारिवा निःक्वाथ्यपयसापीत्वाजीर्णज्वरविनाशनः २५ श्वेतज
यंतीमूलेविपिन्नावद्धं शिखोत्तरे हंति जीर्णज्वरं नराणां रक्तलस्इवदुरितेनचात्मानं २६ इति दुग्धपानविधिः वमनस्वेर
कोष्णोदुकषायलघुभोजनैः यःस्यादतिवलोधातुसहचारीसदागतिः २७ स्येयेसंशमनेसर्पिर्दीप्तस्येवांबुवेशमनः
रूक्षंतेजोज्वरकरं तेजसारूक्षिनस्यच २८ यःस्याद्दत्तुबलोधातुःस्नेहवद्धःसदानिलः कषायाःसर्वएवेति तःसर्पि
सासहयोजिताः २९ प्रयोज्याज्वरशांत्यर्थमग्निसंधुक्षणाय च कल्कांश्चमन्यतिविपाकटुकासेव्यचंदनैः ३० धा
त्रीविल्वामृताद्राक्षासारिवाभिःसुसाधितं हंतिसद्यो घृतं जीर्णज्वरं कासं हलीमकं ३१ अरुचिं विषमं वह्निं यक्ष्
माणं चलवोस्थिते ३२ ● इति क घृतं पिप्पलीचंदनं मुस्तमुशीरं कटुकोषधं कलिंगकोलामलकैः सारि
वातिविषस्थिरा ३३ द्राक्षामलकविल्वाग्नित्रायमाणानिदिग्धिका सिद्धमेतैर्घृतं सद्योज्वरं जीर्णंव्यपोहति ३४

वासागुडूचीत्रिफलात्रायमाणायासकाः पक्वानेनकषायेणपयसाद्विगुणेनच पिप्प
लीमुस्तमृद्वीकाचंदनोत्पलनागरैः कल्कीकृतैश्चविपचेद्घृतं जीर्णज्वरापहं अत्रावगुणाः
क्वाथःपयसःप्रत्येकंस्नेहात् द्विगुणं इति वासाघृतं २

स्वयंकासंशिरःशूलंपार्श्वशूलमरोचकं श्रंगाभितापमग्निंच विषमंसंनियच्छति ३५ पिप्पल्यादिघृतं काथितत्र
क्षीरेणापच्यते इतिपिप्पल्यादिघृतं पंचकोलैःससिंधूत्थैःपलिकैःपयसासह सर्पिःप्रस्थंशृतंप्लीहविषमज्वरगु
ल्मनुत ३६ इतिपंचकोलघृतं मागधीचूर्णकुडवंतस्माद्दशगुणेहविः जलेचतुर्गुणेरोसिद्धंज्वरघ्नंप्लीहनाशनं
३७ इतिलघुपिप्पलीघृतं वृषव्याघ्रीगुडूचीनांपत्रमूलफलांकुरान रसकल्केघृतंपक्वंहंतिकासज्वरारुचीः
३८ इतिवृषाद्यंघृतं गुडूच्यारसकल्काभ्यांत्रिफलायावृषस्यच मृद्वीकायाबलायाश्चसिद्धाःस्नेहाज्वरछिदः
३९ इतिगुडूच्यादिघृतं [illegible] कुलत्थकोलत्रिफलादशमूलयवान्पचेत द्विपलान्सलिलेद्रोणेपादशेषेस्मिन्न
क्षकोक्षिपेत ४० पंचकोलकयष्ट्याह्वंवयस्थाहिंगुतुंबुरू शटीपुष्करमूलार्कमूलान्यतिविषावचा ४१ किराता
तिक्तकंमुस्तंकर्कटाख्यंदुरालभा नक्तमालमुभेपाठेकटुकाशिग्रुतेजनी ४२ सोमवल्कंछिरजनीकटुकीकंटकारि
का पटोलनिंबगोजिह्वाकेतुकीमदनाजया ४३ लवणानिपलांशानिपलेरेखैःपलोन्मितान प्रस्थंचाज्यस्यतत्सिद्धं
दीपनंकफवातनुत ४४ हृद्रोगस्वरहरंगुल्मकासश्वासार्शसांहितं जीर्णज्वराभिभूतानांज्वराणाममृतोपमं
४५ कुलत्थाद्यंघृतं जीर्णेघृतेचभुंजीतमृदुमांसरसौदनं ४६ इतिघृतानि क्षीरवृक्षासनाशिष्ठजंवृसप्तदला

ञ्जुनैः शिरीषखदिरास्फोतामृतवल्याटरूषकैः ४७ कटुकापर्पटोशीरवचातेजोवतीघनैः साधितं तैलमभ्यंगात्स
र्वजीर्णज्वरं जयेत् ४८ इति शिरीषाद्यं तैलं यैवार्द्रकुडवं पिष्ट्वा मंजिष्ठाद्विपलं तथा अम्लप्रस्थशतो मिश्रं तैल
प्रस्थं विपाचयेत् ४९ एतत्प्रल्हादनं नाम तैलं दाहज्वरार्तिनुत् ५० इति प्रल्हादनं तैलं सुवर्चिकानागरकुष्ठमूर्वाला
क्षानिशालोहितयष्टिकाभिः तैलं पचेत् षड्गुणतक्रसिद्धमभ्यंजनाच्छीतविदाहनुत्स्यात् ५१ इति षट्कट्वरं तैलं
लाक्षामधुकमंजिष्ठामूर्वाचंदनसारिवा तैलं षट्चरणो नाम्नाभ्यंगाज्जीर्णज्वरापहं ५२ इति षट्चरणं तैलं लाक्षाम्
बीहरिद्रे द्वे मंजिष्ठासेंद्रवारुणी बृहतीसैंधवं कुष्ठं रास्नामांसीशतावरी ५३ आरनालाढकेनाथ तैलप्रस्थं विपाच
येत् नाम्नांगारकं तैलं सर्वज्वरविमोक्षणं ५४ इत्यंगारकं तैलं लाक्षाप्रस्थं क्वाथयित्वा चतुःप्रस्थमिते जले
पादशेषं जलं नीत्वा तैलप्रस्थे विनिक्षिपेत् ५५ तैलाच्चतुर्गुणां मस्तुगोदध्नश्चात्र निक्षिपेत् शतपुष्पामश्वगं
धां हरिद्रां देवदारु च ५६ रेणुकां कटुकां मूर्वां कुष्ठं च मधुयष्टिकां मंजिष्ठापद्मकोशीरकुस्तामांसीप्रियंगुभिः ५७
मुस्तेन चंदनेरास्नो प्रत्येकं कर्षमात्रकं कल्कीकृत्य क्षिपेत्तैले ततो मृद्वग्निना पचेत् ५८ सिद्धं तैलं वस्त्रपूतं शुभे
पात्रे निधापयेत् तस्याभ्यंगात्प्रशाम्यंति सर्वेपि विषमज्वराः ५९ कासश्वासप्रतिश्यायत्रिकपृष्ठकटिग्रहाः वा

तपित्तोमपस्मारं यक्ष्मराक्षससंभ्रमजान् ४७ कंडूष्णनांगरोगौध्यमंगाविस्फोटकान्जयेत् गुर्विणीपुष्टिमाप्नोतिगर्भेस्थ
सुखमेधते ४८ इतिलाक्षादितैलं लाक्षारससमंतैलप्रस्थंमस्तुचतुर्गुणं अश्वगंधानिशादारुकौंतीकुष्ठाब्दचंद
नैः ४९ समूर्वारोहिणीरास्नाशताह्वामधुकैःसमैः सिद्धंलाक्षादिकंनामतैलमभ्यंजनाद्धिना ५० सर्वज्वरक्षयो
न्मादश्वासापस्मारवातनुत् यक्ष्मराक्षसंभ्रमतघ्नंगुर्विणीनांचशस्यते ५१ लघुलाक्षादितैलं लाक्षाहरिद्रामंजि
ष्ठाकल्केतैलंविपाचयेत् षड्गुणेनारनालेनदाहशीतज्वरापहं ५२ लघुलाक्षाद्यपरः इतितैलानि अथरसाः र
सतोहिंगुलोगंधगंधतुल्यंचटंकणं रसतुल्यंविषंयोज्यंमरिचंपंचधाविषात् ५३ कटुफलंदंतिबीजंचप्रत्येकंमरि
चोन्मितं ज्वरांकुशोरसोह्येषवल्लौगुंजेकमात्रकं ५४ आर्द्रकेननिहंत्याशुज्वरंजीर्णंत्रिदोषजं इतिज्वरांकुशः
रसहिंगुलनेपालाश्च्यादंत्यांबुमर्दिताः वटीयामौज्वरनाशायगुंजैकासितयासह ५५ रसंगंधंविषंताम्रंनेपा
लंगुग्गुलंतथा गुटीवल्लमितासेव्याज्ञायुतासर्वज्वरापहा ५६ इतिरसाः ॥ इतिज्वरतिमिरभास्करेजीर्णज्वरचिकि
त्साकथनंनामषष्ठोध्यायः ॥ स्थानान्निकाशनाद्दोषविहिरभ्यंतराश्रयान् समेत्यशोधयेद्दन्तं देहेसंशोधनंमं
तं १ वमनैश्चविरेकैश्चवस्तिभिश्चयथाक्रमं नशाम्यतेत्यवमपिबेज्ज्वरेकुर्वीतशोधनं २ वमनैरेचनैर्नस्यैर्वस्ति रामः

भिषग्यथाक्रमं ज्वरानुपाचरेद्धीमान्कफपित्तानिलोद्भवान् ३ संसृष्टैः संनिपतितैर्दोषैरेकोल्बणैः समैः ज्वरान्दोषक्रमा
पेक्षी यथोक्तैरौषधैर्जयेत् ४ स्नेहस्वेदादिवमनैर्यस्तु संशोधनं पिबेत् दाहश्शुष्कमिवाग्नस्य देहस्तस्य विनश्यति ५ पाच
नं स्नेहनं स्वेदं वमनं रेचनं क्रमात् पंचकर्मेतथान्यच्च शिरोनस्यं यथोचिते ६ मुस्ताशुंठीचधान्याकं क्काथःस्यात्पाचने हितं
पिबेद्रात्रौ त्रिरात्रं वा तत्तैलस्नेहने हितं ७ इति पाचनं छागपयो घृतं वाथ मधुपर्णघृतो द्रवं भक्षयेद्वापिबेद्रात्रौ समघृतं
सैंधवं चुकैः इतिस्नेहपानं सर्पाक्षी सैंधवं रास्नायष्टी प्रतिपलं पलं सत्क्वथ्य पलान्यष्ट रक्षितैलघृतैः सह ८ सर्वैश्चो
ष्णकृतः स्वेदो ज्वरमर्द्दं शिरोर्त्तिनुत् इति स्वेदनं आमाशयगते दोषे बलिनः पालयन्बलं सैंधवपर्पटतोयेन वमनं पिप्पली
लवणांबुना १० अपक्कमेव नं दोषान्पाच्यमानं विरेचनं निर्हरेद्वमनं स्यान्तः पाकेन प्रतिपालयेत् ११ शार्करामास्निग्धं
मोभिर्दोलहलक्लोत्त्वरोज्वरे ज्वरेप्रच्छर्दनेशस्तं मद्यैर्वातर्पणेन वा १२ कृत्वा मदनसिंधूत्थकल्कं कोष्णं समन्वितं
पाययेन्मधुना क्काथमेतद्वमनमुत्तमं १३ कुमारीतैलकर्षैकं पीत्वा कोष्णजलेन तु विषमे तु ज्वरं हंति वमनेन चि
रंतनं १४ देवदालीफलानां तु चूर्णं तैलेन पेषयेत् गुटिकां गुडसंयुक्तां वमनं कुरुते भृशं १५ स्निग्धं स्विन्नं नरं सम्य
ग्जानुमात्रासनस्थितं कंठमेरंडनालेन संस्पृशन्वामयेद्भिषक् १६ इति वमनं स्निग्धस्विन्न[redacted]

यवांतायप्रदातव्यं विरेचनं अन्यथायोजितं सेन क्रूरशोदोषकलमतं १७ पित्तेन स्यान्मृदुः कोष्ठः क्रूरो वातकफा
श्रयात् मध्यमो मध्यदोषत्वात्मात्रायोज्या स्वरूपतः १८ पक्वेतु शिथिले दोषे ज्वरे वा विषमद्यजे मोदकं त्रिफ
लाश्यामात्रिवृत्पिप्पलिकासमैः १९ ससिता मधुभिर्देयात् शीघ्रं नाशयते ज्वरान् व्योषदंतीत्रिवृत्श्यामानीलि
काउडकल्पितः २० मोदकास्त्रिसुगंधाढ्यो रेकान्सर्वज्वरान्जयेत् त्रिफलांत्रायमाणांवा पयसा ज्वरितः पिवेत्
२१ ज्वराद्विमुच्यते पीत्वा मृद्वीकाभिः ससमयां मधुकारग्वधद्राक्षातिक्तापाठफलत्रिकैः २२ सपटोलैः कृतं क्वा
थोमलभेदी ज्वरापहः तद्वदिंदीवरादारुकटुकारग्वधैः कृतः यावश्यकयुतः क्वाथो मलभेदी ज्वरापहः त्रिवृत्कृ
ष्णाहरीतक्यस्त्रिचतुःपंचभागिकाः २४ गुटिकागुडतुल्यांशा विडंगधस्य गदापहा पयेलारग्वधंतिक्ता विशाला।
त्रिफलावृतत्रत २५ ससारसैंधवोपेतः क्वाथो रेके ज्वरापहः विरेके चातिसंवृत्ते वमनं कारयेद्भिषक् २६ विरेका
यौषधं पीतं सम्यग्नो यदि रेचयेत् पिवेदुष्णां मस्तात्र सैंधवं दोषशांतये २७ सतंक्रुंदं समंगंधं सप्तधामावये
क्रमात् स्नुह्यर्कदुग्धैः श्रीखंडकयश्यामाभयारसैः २८ समंनेपालजं चूर्णं रयमेकत्र मेलयेत् गुंजेचाष्टगुणे
देयो वस्त्रयुग्मोष्णवारिणा २९ मलाः पूर्वं जलं पश्चात्ततस्त्वामः शनैः शनैः उदराद्विनिर्गत्य स्तांसर्वे नियांति रामः

किल्विषे ३० जाते विरेके संशुद्धे पथ्यं दध्योदनं हितं जयेज्ज्वरान्क्षिप्रान्रोगान्त्रसः सारणा स्तु दरः ३१ सैंधवेन युतं व
ज्जी क्षीरं मग्नो विपाचितं द्विकल्ल गुडितं पीतमेक ज्वर विनाशकं ३२ द्राक्षैलाहेमजानां तु गुडिवल्लकयोन्मिता जलैः पी
ता म्लापाने कृत्वा हंति ज्वरोदयं ३३ इति विरेचनं जीर्णज्वरे कफे च्छेदरं यान्नशुद्धिं विरेचनं शिरो गौरि वस्म लभ्रमिंद्रिय प्र
ति बोधनं ३४ मधुना वाथ तैलेन ज्वरघ्नेन प्रयोजयेत् हिंगुसैंधवसंयुक्तं नस्यं स्यात्ररनवं कृतं ३५ विम्बा वा स्तगुडा
वाथ शार्कराद्धतकेशरं भुक्त्वा वत्पथ्यवा स्नातेन नस्यं योज्यं न कर्हिचित् ३६ कृते नस्ये शिरः स्नानं क्रोधादींश्च विवर्जये
त् तर्षेच्छर्दिभ्रमार्त्तस्तु लिह्यात्क्षौद्रसिताभयां ३७ इति नस्यं स्नेहो वास्तिर्निरूहे तु योज्यो वातविकारिषु नेक्षामे क्षीणा।
कृशार्शश्छर्दिमोहोदरादिषु ३८ कल्के मदनमुस्तानां पिप्पल्या मधुकस्य च वत्सकस्य च संयुक्तं वस्तिं दद्याज्ज्वरा
पहे ३९ प्रियंगुमदनं मुस्तं मधुकं ससिताह्वयं कल्कः सर्पिर्गुडक्षौद्रज्वरघ्नो वस्तिरुत्तमा ४० शुद्धे [redacted]
[redacted] मार्गे हृते दोषे सुप्रसन्नेषु धातुषु गतांगमूल्ल [redacted] लघ्वंगः सद्यो भवति विज्वरः ४१ इति वस्तिः ज्वरक्षी।
णस्य न क्षिते वमनेन विरेचनं कामं तु पयसा तस्य निरूहैर्वा हरेन्मलान् ४२ पक्वाशयगते दोषे निरूहश्चानुवास
ने सरुजे निरूहे कार्यं सोशावर्षे निरूहणं ४३ आरग्वधमुशीराणि मदनस्य फलानि च पटोपैश्च नक्तोमधुके

निरूहमुपकल्पयेत् ४४ पटोलारिष्टपत्राणि सोशीरं चचतुरंगुलं ह्रीबेरं रोहिणी तिक्ता श्वदंष्ट्रा मदनानि च ४५
स्थिरा बला च तत्सर्वं पयसार्द्धोदकं श्रुतं क्षीरावशेषं निरूहं संयुक्तं क्षौद्रसर्पिषा ४६ कफपित्तानिलोत्थेषु वि
कारेषु यथाक्रमं एकादशाष्टौ षट् चैव कषायस्य पलानि मताः ४७ स्नेहस्यैकचतुःषट् च चत्वारो मधुनस्तथा
फलद्वयेनु कल्कस्य कर्षः स्यात्सैंधवस्य च ४८ रसक्षीराम्लमूत्राणामेकैकं च क्षिपेत्पलं निरूहकल्पना मा
त्रा कथिते षाम सर्वेभिः ४९ इति निरूहणं कटीपृष्ठगुदार्त्तस्य दीप्ताग्नेरनुवासनं ज्वरे पुराणे संक्षीणे कफ
पित्तहताग्नये ५० रूक्षबद्धपुरीषाय प्रदद्यादनुवासनं पटोलपिचुमंदाभ्यां गुडूच्या मधुकेन वा ५१ मदनेश्च
श्रुतः स्नेहो ज्वरघ्नश्चानुवासनः पटोलमदनारिष्टगुडूचीमधुकैः श्रुतं श्वदंष्ट्रा मदनं श्यंगी मधुकारिष्टवासकैः
कार्षिकैरश्वगंधाभिराढकं तैलतः पचेत् अनुवासनिकं तैलं सर्वज्वरविनाशनं ५४ इत्यनुवासनं दुर्बलस्य
समाध्मानमुदरं सहजं दहेत् दारुहैमवती कुष्ठशताह्वाहिंगुसैंधवैः ५५ अम्लपिष्टैः सुखोष्णैश्च पवनेतूर्ध्व
मागते इत्युदरलेपः ऊर्द्धगे पवने चैव आध्मानसहिताय च बद्धमूत्रपुरीषाय गुदे वर्तिं निधापयेत् ५६ श्या
मा त्रिवृत्पिप्पलि कुष्ठमाषाः फलत्रिकं नीलि सिषट् पलेव त्वग्नागरं त्यागुडसैंधवैश्च वचाफलै र्मूत्रसमांश

पिष्टा ५७ वर्त्तिः कृताङ्गुलपर्वदीर्घा स्वांगुष्ठमाना यवसंनिभा च स्नेहान्विताभ्यक्तगुदे प्रणीता दोषानधो निर्हर
ति प्रसह्य ५८ गृहधूमं गुडं सर्पिर्लवणं कांजिकैः सह पिष्ट्वा या विहिता वर्त्तिः स्विन्ना नामलहारिणी ५९ लवणता कां
चनक्षीरं गुडेन चक्रितेन च वर्त्तिः कृता गुदे क्षिप्ता मलान्सम्यक् विनिर्हरेत् ६० इति गुदवर्त्तिः अथ पक्वदोषोपेक्षणो
दूषणमाह पक्वो यदि निर्हृतो दोषो हि हरेति ष्टीन्मतो भयं विषमं वा ज्वरं कुर्यात् न दत्तव्या पटोलपिवा ६१ दोषाः कदाचित्
कुप्यंति जिता लंघनपाचनैः ये तु संशोधनैः शुद्धा न तेषां पुनरुद्भवः ६२ शीतोष्णस्निग्धरूक्षाद्यैर्ज्वरो यस्य न शाम्य
ति शाखानुसारी तस्याशु मुंचेद्बाह्वोः क्रमाच्छिरां ६३ विषमं वा पुराणं वा न यात्येभिरुपक्रमैः तदा क्षोम्निय कृत्वाहि
वस्तिकर्म प्रयोजयेत् ६४ वीजं पलाशजं गुंजा निशा दंती भवं फलं क्षारद्वयं चातिविषं कंरं झमरसंतकं ६५ रसोनटं
कणं चकं तुल्यकं ररदं विषं भागोत्तरमिदं कृत्वा गोमूत्रेणा सुभावितं ६६ योजयेन्निंबुकद्रावैर्ज्ञात्वामयवलावलं ज्वरा
न्सर्वान्निहंत्याशु सन्निपातान्महोत्कटान् ६७ श्लेष्मणासंभवान्रोगान्तथा वै सर्ववातजान् अमोघवीर्यो रोगेषु
गदोयं गरुडोपमः ६८ विषं द्वयं चनेपालतुल्यकौषणासारदं सज्जीक्षारसमायुक्तो मृगरं ज्वरशल्यजित् ६९ हृद्धात्री
नवसारतुल्यमिरविस्तारोमकूलं विषं तुल्यांशमर्दितं सुनिंबुकरसैः संभावितं सप्तशः तद्वैं द्वीपफलजैरसैरपि सक

ज्व·ति·भा· द्रोहीतपित्तेनवाप्यालेपाद्गदःसमीरराहुःज्वाम्लल्पत्वशाल्यापहः ९० औरनीसादरंतुल्यंलवंउमितुकजेरसे · गद्दोयेस्तु
कुमारेष्ववारितोखिलरोगहा ९१ अभ्यंगाद्लेपसेकादीनज्वरेजीर्णेत्वगाश्रिते कुर्यादंजनधमोश्चगंडूषकवलग्रह
न ९२ विभज्यशीतोष्णकृतान्यथादोषंप्रकल्पयेत ९३ कलशमहणमग्रेसर्पिषासंभृतंवामधुगुडजलतैलैस्त
ण्डुलद्रोणसंस्थं सितसिचयपुगेनावेष्टितंवंशयंत्रस्थितविमलतमायब्राह्मणायप्रदद्यात ९४ सर्पिःपयस्तिलै
र्हेमसोमचउस्यतुष्टये स्ववर्णोदक्षिणाय ह्रैन्मंत्रमेनमुदीरयेत ९५ महेशदेवदेवेशवासुदेवपरात्पर कुंभ
दानेनदमैनज्वरःक्षिप्रंप्रणश्यतु ९६ सततसन्निपातेचतृतीयकचतुर्थके पाक्षिकंमासिकेचापिसांवत्सरि
कमेवच ९७ नाशयेतांममक्षिप्रंवासुदेवमहेश्वरौ इतिदानमंत्रः कलशमहणमीदृशंप्रदापक्षितिविबुधा
यश्रुतिस्मृतान्यपाय तदहनितिलमाषलोहदानंविमलमतिर्विदधातिदुग्धपानं ९८ इतिकलशदानविधिः दधा
दुष्ट्वज्वरविरतयेराजतंवापितास्रंगघाणानोसुपरिहरितंपंचत्रिंशद्बलानां मधन्मर्तिंमकरममलेरत्नलग्नं
लजिह्वंकांतंभास्वत्कनकनयनंकृष्णवस्त्रावृतांगं ९९ अभिनवघृतपूर्णेकांस्यपात्रद्वयेस्यानस्यान्यच्छायोद
कम्भातिपयोनामपात्रेस्थितिश्च श्रुत्याचारप्रशमनिधयोनिर्ष्ठनायद्विजायस्तुत्यानत्यावसुवितरणैःसाधुसं रामः

तोषिताय २० गुडुयाद्वैष्णवैर्मंत्रैर्मोहेशोश्च शुभं हविः तथा पुराणपठितं मंत्रमेतमुदीरयेत् २१ नमो महेशदे
वेशावासुदेव परात्पर मकरस्यास्य दानेन ज्वरः क्षिप्रं प्रणश्यतु २२ एकांतरं संततं च तत्तृतीयकचतुर्थको पा
क्षिकं मासिकं चापि सांवत्सरिकमेव च नाशयेतां ममक्षिप्रं वासुदेवमहेश्वरौ २३ इति मकरदानविधिः ॐ
इति ज्वरतिमिरभास्करे शोधनादिकथनं नाम त्रयोदशोऽध्यायः ॐ अन्ये प्यजीर्णोद्भवाः स्युर्मलजागुर्विणीभ
वाः सूतिकाबालविस्फोटशीतलाप्रमुखाज्ज्वराः १ क्रिमिजाः कालजाश्चैवं वक्ष्ये तेषां चिकित्सितं विरेकं विरसोद्गारछर्दिः
पीडानयोदरे २ भवंत्येतानि चिह्नानि विष्टब्धे जीर्णजे ज्वरे अजमोदाहरीतक्यौ सौवर्चलसमन्वितं ३ कर्चूरेणसमं चू
र्णं जीर्णज्वरविनाशनं इति जीर्णोद्भवः जृंभोद्गारव्यथास्फोटस्वरशक्तिर्विभिदृष्टिजे ४ हिंगुमरिचपिप्पल्योः किरातशुं
ठिसंयुतं चूर्णमुष्णाम्बुना पेयं दृष्टिज्वरविनाशनं ५ इति दृष्टिज्वरः अंगभंगो मुखे स्वासो गात्रस्थैर्यापिस्फक्लमा तृष्णा
मूर्च्छा मयाध्मानं लक्षणं रक्तजे ज्वरे ६ द्राक्षारक्तचोक्षहतीहरिद्राधत्तामयावे[illegible]कषायः द्रोक्षीणामिश्रो विनिहन्ति
ज्वरं रक्तोद्भवं सूलयुतं ज्वरं च ७ रोहितं देवकाष्ठं च वरुणां शिग्रुमेव च हरिद्रा पिप्पली मूलं क्वाथो यं रक्तजं जयेत पल्ल
वानि करीरस्य मधुसंमिश्रितानि च शोणितप्रभवं तापं पीतमात्रे प्रशाम्यति ८ इति रक्तजः शोकत्रासप्रलापं च भ्रमं म

द्दोशिरोरुग्यथा हिक्काछर्दिश्वासशूलंचलक्षणोमलजेज्वरे १० कटुकापिप्पलीमूलंमुस्तंचैवहरीतकी समभागयुतःक्वाथो
मलज्वरविनाशनः ११ इतिमलोद्भवः दोषैर्योनादिकागंतुमानसैरुपतापजैः ज्वरोभवतिगुर्विण्याः सातुयत्नाच्चिकित्
स्यते १२ चंदनंसारिवारोध्रंमृद्वीकाशर्करान्वितं क्वाथंकृत्वाप्रदातव्यंगर्भिण्याज्वरशांतये १३ मधुकंचंदनोशीरंसारि
वायष्टिपद्मकं क्षौद्रोत्पलयुतःक्वाथोगुर्विण्याज्वरनाशनः १४ ह्रीवेरारग्वधरक्तचंदनबलाधान्याकवत्सादनीमुस्तो।
शीरयवासपर्पटविषाक्वाथंपिवेद्गुर्विणी नानावर्णरुजातिसारसकृगदेरक्तस्रुतौवाज्वरे योगोयंमुनिभिःपुरानि
गदितःसस्तामयेचोत्तमः १५ धान्यपद्मकाम्रतोशीरक्वाथोवाज्वरनाशनः पिवेद्विश्वमज्जाक्षीरैर्नाशयेद्विषमज्वरा
न १६ आम्रजंबूत्वचःक्वाथ्यलेहयेल्लाजसक्तुभिः अनेनलीढमात्रेणगर्भिण्याग्रहणींजयेत् १७ कुशकाशोरुबू
कामूलंमलैगोक्षुरकैःश्रुतं पिवेद्दुग्धंसितायुक्तंगर्भिण्याःशूलनुत्परं १८ इतिगुर्विणीचिकित्सा अंगमर्दोज्वरःकं
पःपिपासागुरुगात्रता शोथःशूलातिसारोचसूतिकाज्वरलक्षणं १९ दीप्योरोहिणजाज्योचवंसत्वक्त्वादिरं
पंचस्वर्णोनमासनोबोलोमिशिक्वाथमामयराजे २० क्वाथोमोचरसोपेतःसघृतःसत्याहितप्रदः दशमूलकृ
तंतोयंकोलसंचहविषान्वितं जयेत्पीतंसूतिरुजंदुर्जयंपथ्याशिनस्त्रियः २२ सहचरमुस्तगुडूचीभद्रोत्कटपरिस्व

बाल्वकैः क्वथितं पेयमिदं मधुमिश्रं सद्योज्वरशूलनुत्सूत्याः २३ देवदारुवचाकुष्ठं पिप्पलीविश्वभेषजं
कट्फलं मुस्तभूनिंवतिक्ताधान्यहरीतकी २४ गजकृष्णाचदुस्पर्शा गोक्षुरं धन्वयासकं बृहत्यतिवि
षाछिन्नाकर्कटं कृष्णजीरकं २५ समभागान्वितैरेतैः सिंधुरामठसंयुतं क्वाथमष्टावशेषं तु प्रसूतां
पाययेत्स्त्रियां २६ शूलकासज्वरश्वासमूर्छाकंपशिरोर्तियुत् युक्तप्रलापतृड्दाहतन्द्रातीसारवांत
था निहंति सूतिकारोगं वातपित्तकफोत्थितं २७ पंचमूलस्य वा क्वाथं तप्तलोहेन संगतं सूतिकारोगना
शायपिबेद्वातविध्वंसनं २८ पिप्पलीदेवकाष्ठं च भद्रमुस्तकमेव च अगुरुः पिप्पलीमूलं सूक्ष्मरूपाणि पिष्ट
तु कारयेत् २९ तक्रेण सह संयुक्तं पचेदेवं विचक्षणः एतेन घृतयुक्तेन पीतमात्रेण निश्चितं ३० वाति
कं पैत्तिकं चैव श्लेष्मिकं सान्निपातिकं सूतिकोपद्रवं हंति वृक्षमिंद्राशनिर्यथा ३१ यवकोलकुलत्थानां
शालिमूलं तथैव च शस्तायं सूतिकातंके पथ्यः सर्वरुजापहः ३२ जीरकं लशुनं धान्यं शताह्वा वरा
च यवानी मेथिका हिंगु पत्रिका कामरूपकं ३३ पिप्पली पिप्पलीमूलमजमोदा यवाग्निका चित्रकं।
चपलाशांति तथान्यच्च चतुः पलं ३४ कसेरु नागरं च कुष्ठं जीरकमेव च गुडस्य च शतं दद्यात् घृतप्रस्थं

तथैवच ३५ क्षीरंहिमस्यसंयुक्तंशनैर्मृद्वग्निनापचेत् पंचजीरकमित्येषसूतिकायांप्रशस्यते ३६ ग
र्भार्थिनीचयानारीबंहणीयेचमारुते विंशतिर्व्यापदोयोनेःकासश्वासज्वरक्षये ३७ हलीमकंपा
ण्डुरोगंदुर्गंधंमूत्रचलछूनं हंतिपीनोन्नतांकुर्यात्पद्मपत्रायतेक्षणां ३८ उपयोगात्स्त्रियांनित्यमल
क्ष्यामलवर्जितां ३९ इतिपंचजीरकगुडः सूतिकारोगशांत्यर्थंकुर्यात्स्नानहरींक्रियां स्वेदावगाहनाभ्यं
गसावगाहःप्रशस्यते ४० इतिसूतिकाज्वरः सक्षीरेचाप्यदुग्धेवादोषाःप्राप्यस्तनौस्त्रियाः प्रदुष्य
मांसरुधिरंस्तनरोगान्ज्वरोभवेत् ४१ जलौकाभिर्हरेद्रक्तंनस्तनाउपनाहयेत् पित्तघ्नानिचशीता
निद्रव्याण्याशुप्रयोजयेत् ४२ याजयेद्वमनंसर्वंगतिंसंरक्ष्यपाचयेत् लेपोविशालामूलेनहंति
पीडांस्तनोत्थितां ४३ इतिस्तनपीडाज्वरः गुरुभिर्विविधाहारैर्दुष्टैर्दोषैःप्रदूषणैः क्षीरंधात्र्याःकुमा
रस्यनानारोगायकल्पते ४४ शिशोस्तीव्रामतीवांचरोदनाल्लक्षयेद्रुजं मलनायेज्वराःप्रोक्तास्ते
पिबालेभवंतिहि ४५ यथादोषोचितंकार्यंभैषज्यंलघुमात्रया क्षीरमस्यौषधंधात्र्याःक्षीरान्ना
दस्यचोभयोः ४६ अन्यंनानाशिशोर्देयमौषधंभिषजोत्तमैः मात्रयालेह्ययेद्धात्रींशिशोर्नौकंविशो

षणां ४७ सर्वैर्निवार्यते बालैः स्तन्यं न प्रतिवार्यते स्तन्याभावे पयश्छागं गव्यं वा तद्गुणं पिबेत् ४८ मत्पिंडेनाग्निव
र्णेन क्षीरसिक्तेन सोष्मणा यथायोगं स्तनौ लिह्याद्दोषधैः पाययेच्छिशुं ४९ भद्रमुस्ताभयानिंबपटोलमधुकैः कृ
तः क्वाथः सोमस्तबालानामशेषज्वरनाशनः ५० लाजा यष्टिस्तथा मांसी मधुकैश्चूर्णितैः समैः मधुयुक्तैः ।
शिशोर्लेहः सर्वज्वरनिवारणः ५१ बृहतीफलमूलत्वक्स्ना ग्रंथिकसंभवैः तुगाक्षीरीयुतः क्वाथः पी
तो हंति शिशोर्वमिं ५२ मूर्छां श्वासं ज्वरं कासमतीसारं च पीनसं हरिद्राद्वययष्ट्याह्वसिंहीशक्रयवैः कृतः ।
शिशोर्ज्वरातिसारघ्नः कषायः स्तन्यदोषजित् ५३ धातकीबिल्वधान्याकरोध्रेंद्रयवबालकैः लेहः क्षौद्रेण बाला ३१
नां ज्वरातीसारवांतिनुत् ५४ ह्रीवेरं शार्कराक्षौद्रं पीतं तंडुलवारिणा शिशोरक्तातिसारघ्नं तृट्छर्दिज्वरनाशनं
५५ शृंगी समुस्तातिविषां विचूर्ण्य लेहं प्रदद्यान्मधुना शिशूनां कासज्वरच्छर्दिभिरर्दितानां समाक्षिकं चातिवि
षामथैकां ५६ मुस्तकातिविषावासाकणाशृंगीरजो लिहन् मुच्यते मधुना बालः कासैः पंचभिरुत्थितैः ५७ हिं
गुसैंधवपालाशचूर्णं माक्षिकसंयुतं लीढं निवारयत्याशु शिशूनामुद्दतोरुजं ५८ पलंकषा वचा कुष्ठं ग
जचर्माक्विर्मेच निंबपत्रं तु माक्षीकं सर्पिर्युक्तं तु धूपनं ५९ ज्वरवेगं निहंत्याशु बालानां तु विशेषतः स

श्रीगुरुः

४९

ज्व·ति·भा

पित्तक्षितयारिष्टपत्रवासोजनीवचा ६० रसोनहिंग्वजालोमश्टंगीमस्त्विमाक्षिकैः धूपः सर्वज्वरघ्नोयंकुमारा
णांज्वरापहः ६१ कल्हादुरालभाद्राक्षाकर्कटाख्यात्वगाभया चूर्णितामधुसर्पिभ्यांलीढाहंतिशिशोर्गदं ।
कासंश्वासंसतमकज्वरंचापिनियच्छति ६२ इतिबालज्वरचिकित्सा दोषात्त्वचंसमाश्रित्यासृङ्मांसास्थि
प्रदूषयन् देहेघोरांश्चविस्फोटान्कुर्वंतिज्वरपूर्वकान् ६४ तत्रादौलंघनंकार्यंवमनंपथ्यभोजनं यथादोषंव।
लंवीक्ष्यकुर्याच्चैवचिकित्सितं ६५ केवलानिलवीसर्पविस्फोटाभिहतेज्वरे सर्पिःपानंहिमालेपाःसेकमांस
रसोदनं ६६ कुर्याद्यथास्वंभुक्तिंचरक्तमोक्षादिसाधनं पटोलामृतभूनिंबवासकारिष्टपर्पटैः खदिराब्दयु।
तःक्वाथोविस्फोटज्वरशांतये ६७ कुंभ्लीपिचुमंदाब्दखदिरेन्द्रयवांबुना विस्फोटकज्वरान्हंतिवायुर्जलधरानि
व ६८ अमृतवृषपटोलंमुस्तकंसप्तपर्णीखदिरमसितवेत्रंनिंबपत्रंहरिद्रे विविधविधविसर्पिःकुष्ठविस्फोटा
कंडूरपनयतिमसूरींशीतपित्तंज्वरंच ६९ शिरीषयष्टीनतचंदनैलामांसीहरिद्राद्वयकुष्ठवालैः लेपोदशांगःस
घृतःप्रयोज्योविसर्पकंडूज्वरशोफहारी ७० इतिदशांगलेपः इतिविस्फोटज्वरचिकित्सा कफपित्तप्रकोपाद्वा
भवेत्कुक्ष्यग्रहेक्षणात् ज्वरपूर्वाचरोमांतीलोकेशीतलिकामता ७१ मसूरीवहुधाप्रोक्तातत्रज्वरचिकित्सितं

रामः

४९

सुही

शीतलादोषसंपाते जाते मधुविमिश्रितः ७२ निवर्त्तिं कुरुते प्रातः पीतं पर्युषितं जलं पित्तश्लेष्मविसर्पोक्ता क्रियाचात्र
प्रदृश्यते ७३ तत्रादौ तर्पणं कार्यं लाजचूर्णैः सशर्करैः भोजनं तिक्तयूषैश्च प्रतुदानां रसेन वा ७४ सेकाभ्यंगप्रदे
हाश्च कार्यं तिक्तेन सर्पिषा कोष्णं स्नेहोपनाहाश्च वर्त्तिरंतश्च सर्वतः ७५ गुडूचीमधुकं द्राक्षा मोरटं दाडिमैः सह पा
ककालेच दातव्यं भेषजं गुडसंयुतं ७६ तेन पाकं व्रजत्याशु नच वायुः प्रकुप्यति पटोलकुंडली मुस्ता वृषधान्ययवा
सकैः ७७ भूनिंबनिंबकटुकापर्पटैश्च शृतं जलं मसूरीं शमयेदाशु पक्वां चैव विशोधयेत् ७८ नातः परतरं किंचिच्छी
तलादिज्वरापहं पटोलमूलारुणतंडुलीयकं पिबेद्धरिद्रामलकल्कसंयुतं मसूरविस्फोटविसर्पशांतये तदेव रोमां
तिवमिज्वरापहं ८० निंबपर्पटकं पाठापथ्यैलं कटुरोहिणी वासा दुरालभा धात्री सुशीरं चंदनद्वयं ८१ एषः निंबा
दिकः ख्यातो योगः शर्करयान्वितः मसूरीं सर्वजां हंति ज्वरं वीसर्पसंभवं ८२ उत्थितां प्रविशेद्याश्च पुनस्तां वा सतो भ
वेत् सुषवीपत्रनिर्यासो हरिद्राचूर्णसंयुतं ८३ तीव्रज्वरविसर्पोत्थे मसूरीशांतये पिबेत् बिल्वपत्ररसेनैव मू
र्छितः पारदेश्वरः हिलमोचीरसेनैव पीतो मधुसमायुतः मसूरिं सर्वजां हंति अस्थिजां सर्वदेहजां ८५ मूर्च्छाध्मान
परीतस्य कंपमानस्य वायुना रसो जांगलजः शस्तः ईषत्सैंधवसंयुतः ८६ दाडिमाम्लेन रसेनैर्यूषः पेयात स्याहृतो हि

श्रीगुरुः

५०

ज्व-ति-भाः ना पिबेदंभस्तथाशीतंभाविनंरवदिशादिभिः ८७ कुर्यात्स्नानविधानंचनैत्यादीन्वर्जयेच्चिरं जपहोमो
पहारैश्च दानस्वस्त्ययनादिभिः ८८ वटाष्टकंद्विजान्गावः शिवंगौरींचपूजयेत् अगदानिविषघ्नानिश
स्तानिचभिषग्वरैः ८९ धारयेद्वचयेद्वापिवेननतेयस्यसंहितां विषंवातस्ययेनैयांनभवंतिगदान्ररोगा
९० व्रणशोफहरैर्योगैर्वीतरोगहरैस्तथा उष्ट्रव्रणोषुतैलंवंजलौकाभिर्हरेद्रक्तं ९१ इतिशीतन्नाम
सूतिकाज्वरचिकित्सा ज्वरोविवर्णताशूलंहृद्रोगश्छर्दनंभ्रमः भक्तद्वेषोतिसारश्चसंजातकृमिल
क्षणं १ पलाशबीजंपिचुमंदशिग्रुपर्णंवृहद्दलविडंगयुक्तं कषायमेषांविहितंसुखेनकृमिज्वरंहंति ।
नसंशयोत्र ९२ इतिकृमिज्वरचिकित्सा गतागतानिधमनीचापल्यंकुरुतेभृशं उर्ध्वश्वासःकांतिनाशः
स्वेदोगात्रेतिशीतता ९३ वैकल्यमिंद्रियाणांहिज्वरेवैकालसंभवे गोभूहिरण्यदानानिसप्तधान्यानिश
क्तितः ९४ विधायस्नातुरंश्राद्धंसर्वंदेयंद्विजातये षडंगंदशपंचंवाकार्यंपापविशुद्धये ९५ शास्त्राच्चै
वगुडूचीचमुस्तापर्पटकंतथा कटुकीचसमःक्वाथःकालज्वरविनाशनः ९६ रसायेपूर्वमुद्दिष्टामहाभैरवका
दयः देयास्तेमृत्युनाशार्थंनिःपापायातुरायते ९७ ॥ इतिज्वरतिमिरभास्करेअजीर्णादिदशज्वरभे रामः

५०

२ कथनंनामचतुर्दशोध्यायः ॐ आधानजन्मनिधनेप्रत्ययींख्याविपत्करे नक्षत्रेव्याधिरुत्पन्नः क्लेशायमरा
णायच १ नेष्टयांमरणंनक्षत्रं वृषकुंभतुलालिस्थितां मीनेधनुषिभद्रायांजयायांकन्यकायुगे रिक्तायांकर्कटेमेषे
पूर्णायामलिसिंहयोः जन्मा[illegible]ष्टांकगेचंद्रेऽदितेरोगिणांमृतिः ३ रवौविलग्नेरविभौमवारेरिक्ताति
थौचंद्रबलेचहीने केन्द्रत्रिकोणेषुगतेषुपापेस्नानंहितंरोगविमुक्तभाजां ४ एकोत्तरशतंमृत्युर्भुवते
वेदवादिनः एकंतुकालरूपेणशेषास्त्वागंतवोमताः ५ औषधीभिरनेकाभिर्नश्यंत्यागंतवोगदाः
विविधौषधसंयोगात्कालमृत्युर्नशाम्यति ६ ज्वरःप्राणहरोयस्मात्तस्मात्तस्यविशेषतः तस्यांतस्या
मवस्थायांकुर्यात्तद्भिषग्वर्जितं ७ लक्षणंज्वरमुक्तस्यपूर्वोक्तंश्वक्रियाक्रमः ज्वरमुक्तोनसेवेतजाव
न्नबलवान्भवेत् ८ शीततोयदिवास्वप्नक्रोधव्यायामयोषितः गुर्वसात्म्यविदाह्यन्नंयच्चान्यज्ज्वरकारणं
९ विरुद्धान्यन्नपानानिस्नानंचंक्रमणानिच उद्वर्तनमवश्यायमातपंचविवर्जयेत् १० अबलोभजतेयस्तुपुन
रावर्ततेज्वरः प्रत्यावृत्यादहेद्देहंशुष्कंकाष्ठमिवानलः ११ तस्मात्कार्यःपरीहारोज्वरमुक्तेनजंतुना गुर्वभिष्यंद्यसा
त्म्यान्नभोजनंनपुनर्गमे १२ लंघनोष्णोपचारादिविधिंपूर्वोक्तमाचरेत् किराततिक्तकंतिक्तामुस्तापर्पटकामृता १३

द्वंतिपीनानिचाभ्यासात्पुनरावर्तितंज्वरं इतिपुनरावर्तितज्वरचिकित्सा मनोभिराममविषयात्स्तवनंतार्हिलक्षणं करुणा
र्द्रमनःश्रुतंसर्वज्वरनिषूदनं १४ मातरंपितरंदेवान्विप्रान्वेधान्हरंहरिं पूजयेच्छीलयेद्दानमेतैःसत्यव्रतजयात १५ धार
येच्चश्रुतिस्मृतीमणिरत्नमहौषधी आर्यावलोकितांपर्णशवरीमपराजितां १६ प्रणामेद्धार्येतारांचसर्वज्वरनिवर्तये वि
ष्णुंसहस्रमूर्द्धानंचराचरपतिंविभुं १७ स्तुवन्नामसहस्रेणज्वरान्सर्वान्व्यपोहति १८ इतिकायस्थचामुंडकृतेज्वरतिमि
रभास्करेज्वरलक्षणंनामपंचदशोध्यायः ॥ अथज्वरोपद्रवचिकित्सा व्याधेरुपरियोव्याधिर्भवत्युत्तरकालजः उ
पक्रमविघातीचसउपद्रवउच्यते १ अतीसारोवमीहिक्काकासश्वासारुचितृषा मूर्छाविबंधोग्निसादोज्वरस्योपद्रवा
दश २ तृषाभार्याकासश्वासौसुतौहिक्कावमीसुते अतीसारोभवेद्भ्राता अरुचिर्भगिनीमता ३ भागिनेयो।
विबंधःस्यात्स्थिमांद्यश्वशुरःस्मृतः मूर्छाचेटीसकाप्तेतेज्वरस्योपद्रवादश ४ ज्वरेशांतेप्रशाम्यंतिसद्यः
सर्वेप्युपद्रवाः ज्वरमुक्तोचिकित्सांचबलवंतमुपद्रवं ५ अपक्वमलसंपातोभवेद्यदिकुवैद्यतः तदाक
ष्टमवाप्नोतिरोगीप्राणविनाशनः ६ व्यवमानंज्वरोत्क्लिष्टमुपेक्षेततुमलातुरः अतिप्रवर्तमानंतुयाचये।
त्संग्रहंनयेत ७ पक्वोपिहिविकुरुतेदोषःकोष्ठकृतास्परः ज्वरातीसारयोरुक्तंभेषजंयत्पृथक्पृथक् ८

ननन्मिलितयोःकार्यमन्योन्यंवर्द्धयेत्ततः अनस्तौप्रतिकर्तव्यौविशेषोक्तिचिकित्सितैः ९ लंघनंत्वभयोरत्रौनेतः
कार्यविशेषतः ज्वरातिसारीपेयांवापिबेत्साम्लांसत्तोनरः १० पृष्णिपर्णीबलाबिल्वनागरोत्पलधान्यकैः धातु
कीक्काथसंसिद्धःविश्वभेषजसंस्कृताः ११ दाडिमाम्लयुतंपेयंज्वरातीसारशूलिने पाठेन्द्रजवभूनिंबमुस्ता
पर्पटकामृताः १२ जयंत्याममतीसारंज्वरंसर्वमहौषधं नागरातिविषामुस्ताभूनिंबामृतवत्सकैः सर्वज्वरहर
क्वाथःसर्वातीसारनाशनः १३ पंचमूलीबलाबिल्वंगुडूचीमुस्तनागरं पाठाभूनिंबह्रीवेरंकुटजत्वकफलंस्मृ
तं १४ हंतिसर्वज्वरान्दोषंवमितृष्णारुचीस्तथा सश्वलोपद्रवंश्वासंकासंहन्यात्सुदुस्तरं १५ विडंगातिविषामु
स्तभूनिंबामृतवत्सकैः सर्वज्वरहरःक्वाथःसर्वातीसारनाशनः १६ विडंगातिविषामुस्तादारुपाठाकलिंगकाः
मरिचेनसमायुक्तंज्वरातीसारशोथजित १७ ह्रीबेरातिविषामुस्ताबिल्वनागरधान्यकं पचेत्पीत्वामवंध
घ्नःशूलदोषामपाचनं १८ सशोणितमतीसारंसज्वरंवाथविज्वरं गुडूच्यतिविषाबिल्वशुंठीपाठाद
पम्रकैः १९ पाठाभूनिंबकटुजेश्चंदनोशीरपर्पटैः पिबेत्कषायंसक्षौद्रंज्वरातीसारशांतये २० हृल्ला
सारोचकच्छर्दिपिपासादाहनाशनं क्वाथेनदशमूलस्यविश्वामाक्षिकसंपिबेत् २१ ज्वरेश्चैवातिसारेश्च

ज्व·ति·भा· सशोथेग्रहणीगदे २२ इतिज्वरातीसारचिकित्सा क्वाथोगुडूच्यासमधुःसुशीतःपीतःप्रशांतिंवमनस्यकुर्यात
विरामाक्षिकाणांमधुनावलीढासचंदनाशार्करयान्विताच २३ त्वाजामाक्षिक
वैदेहीरवित्यरससमिश्रितः लिहेन्नपिनरोनूनंवमिंजयतिवेगतः २४ सगुडोचर्मजःक्वाथःसक्षौद्रःश्रीफल
स्यवा वमिंचहरतेशीघ्रंमर्द्धैवातंदुलांबुना २५ इतिवमिज्वरचिकित्सा नीरेणसिंधूत्थरजोतिसूक्ष्मंनस्य
नतनंविनिहंतिहिक्कां मयूरपिछस्यमषीसकृष्णामध्वान्वितावाकटुकासधातुः २६ शुंठीपथ्याकणाला
जाभार्गीश्रृंगीसमांशकैः हिक्कांपंचविधांहंतिलेहोयंमधुनाप्लुतः २७ अष्टावलेहिकाबाथचतुर्भद्रावले।
हिका पूर्वोक्ताअप्रहातव्याश्रृंगवेररसैर्युताः २८ इतिहिक्काचिकित्सा कासेकणाकणामूलंकलिद्रुमफ
लंरजः सविश्वभैषज्जंलिह्यान्मधुनावावृषारसं २९ व्योषाग्नियाष्टिकाभार्गीतिक्ताकटुकरोहिणी
किरातखदिरैर्युष्टयःकफकासज्वरेहिताः ३० विषव्योषपथ्याश्रीफलकरकुलिंजनकिलिमाभयाभार्गीश्रृं
गीसुरसुमरांधामलमुस्तैः त्वंबंगैलैपैलाकलिकरलकुमारीरसंतैःस्वकर्षैःकासांकुशप्रतिरसोयंनिग
दितः ३१ इतिकासज्वरचिकित्सा त्रिकटुसटीवनश्रृंगीभार्गीगर्दभशाकंसपौष्करंसपादे श्वासंजयतिप रामः

कि३

योधरस्तथालतापंचमूलजलपीतं ३२ दुरालभाकणाद्राक्षाश्रृंगीकल्काच्चूर्णितं मधुसर्पियुतोले
हः श्वासकाशापतंत्रजित ३३ शृंगीव्याघ्रीपटोल्यग्राव्योषभार्गीसमपकैः चूर्णमुष्णोदकेश्वासकासहृ
न्मर्द्धवातजित ३४ इतिस्वासज्वरचिकित्सा अरुचौवतिन्नकरसौरसकल्कवलग्रहस्तथाम्लरसैअरुच्याव
तितिररसैः सफलत्कवलग्रहस्तथाम्लरसैः मधुलवणमातुलिंगीफलकेसरधारणंवक्त्रे ३५ इत्यरुचिज्वर
चिकित्सा पीनंशीतजलंक्षौद्रंआकंठंवामयेद्भिषक वटांकुरामयक्षौद्रलाजानीलोत्पलैर्हिमैः ३६
गुटिकांवक्त्रेक्षिप्ताक्षिप्रंतृष्णामुदस्यति अर्द्धावतिनपानीयसलाजैःशीतलैमधुः ३७ तेजराजयु
नाद्राक्षांक्षिप्तापीतेनतृषांजयेत खीरेक्षुरसमृद्वीकाक्षौद्रसिंधुगुडोदकैः ३८ वृक्षाम्लामलगंडू
षैस्तालुशोषप्रणाशनः इतितृष्णाज्वरचिकित्सा मूर्छायामिहशीतमालतहारहूराकद्वीभिः स
जलपर्पटाभयाभिः संसिद्धंजलमतिशीतमिष्टपुत्रंलेह्यवामधुतत्वनासिताभयाभिः ४० शीता
म्भसाक्षिप्तसेकः सुरभिर्धूपः सुमनसश्चशुभाः मृदुतालवृंतवातीकदलीदलकमलसंस्पर्शः ४१
इतिमूर्छाज्वरचिकित्सा विबंधेवातजित्कर्मकुर्यादत्रानुलोमनं मलंप्रवर्तयेन्नाशुतीक्ष्णाभिःफलवा रामः

श्रीगुरुः

५३ 53 (ult.)

ज्व·ति·भा· तिभिः ७२ इतिविडंबचिकित्सा शास्त्रेज्वराविधेयेनैयाशास्त्रंभिषग्जितं इतिआम्निसादः देशोश्रीमेद
पाटेरसयुगरसभूमत्सवर्षेदशम्यांशुक्लायामाश्विनस्यांत्रिदशगुरुदिनेयोगिनीयत्रनस्य भूपेश्री
जमल्लेविलसतिवसुधामंडलेकुंभस्तनुःकायस्थश्रीवंडनाम्नाज्वरतिमिरहरंभास्करंसंविधत्त ७३ ॥ इ
तिश्रीकायस्थचामुंडकृतेज्वरतिमिरभास्करेज्वरोपद्रवकथनंनामषोडशोध्यायः ॥ संवत् १८ ८४